Shri Raghunatha Temple MSS. Library,
JAMMU

No. १३० / घ

Title महाभाष्यप्रदीपः (नमआ. [illegible] दा. ३४अ.)

Author कैय्यटः

Extent ५५ पत्र Age सं. १८१६

Subject व्याकरण

© Dharmartha Trust J&K. Digitized by eGangotri

महाभाष्यं प्रदीपाभिधटीकासहितम्
चतुर्थपादतृतीयाह्निकम्

~~भाष्ये पद[illegible]~~
~~४ पाद ३ आह्निकम्~~

१३०

२५ पन्नानि

© Dharmartha Trust J&K. Digitized by eGangotri

भाष्यैकेय्यटप्रथमाध्यायचतुर्थचरणतृतीयाह्निक॥

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰के॰

श्रीगणेशाय नमः॥ ॥कारके॥ किमिदमिति। सप्तमीनिर्देशात्तावत्संज्ञात्वेनाधिकारः। संज्ञया भाव्यमानत्वात्प्रथमानिर्देशस्य न्याय्यत्वात्। अथ विशेषणत्वेनाधिकारः तदा कारकादित्यध्याहृतयोरित्यादावपादानादिसंज्ञाविकल्पस्यापि कारकस्य ग्रहणं प्राप्नोति। षड्विधस्यैव वक्ष्यते। तद्व्यतिरिक्तं च कारकमस्त्यप्यानर्थक्यमस्य ग्रहणमिति प्रश्नः। संज्ञानिर्देश इति। सुपां सुपो भवन्तीति प्रथमायाः स्थाने सप्तमी कृतेति भावः। किं वक्तव्यमिति। सप्तमीनिर्देशाद्युक्तः संज्ञापक्ष इति भावः। नहीति। सुव्यत्ययः उक्तः। नवायमिति। शास्त्रे लोके च प्रसिद्धाभावाकृतविभक्त्यनुत्पत्त्या भाव्यमानविभक्तेः प्रथमायाः स्थाने सप्तमी कृतेति भावः। संज्ञिनो निर्देश इति। यद्यपि वक्ष्यमाणा ध्रुवादयः संज्ञिनो तथ्यं तेन यापि विशिष्टः संज्ञी निर्देष्टव्यः। यत् क्रियायाः साधकं ध्रुवादि तत्कारकसंज्ञं भ·

श्रीः॥ कारके॥ किमिदं कारके इति। संज्ञानिर्देशः। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। इह हि व्याकरणे ये वा एते लोके प्रतीतपदार्थकाः शब्दास्तैर्निर्देशाः क्रियन्ते। या वा एताः कृत्रिमा टिघुभसंज्ञाः। न चायं लोके ध्रुवादीनां प्रतीतपदार्थकः शब्दः न खल्वपि कृत्रिमा संज्ञा अन्यत्राविधानात् संज्ञाधिकारश्चायं तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः संज्ञायाः। कारक इति संज्ञानिर्देशश्चेत् संज्ञिनोऽपि निर्देशः। कारक इति संज्ञानिर्देशश्चेत् संज्ञिनोऽपि निर्देशः कर्तव्यः। साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यं॥

पादानसंज्ञं च भवतीति। ननु संज्ञापक्षे कारकसंज्ञाया अपादानादिसंज्ञाभिः समावेशो न प्राप्नोति। एकसंज्ञाधिकारात्। नैष दोषः। ध्रुवमपाय इति योगविभागेन कारकसंज्ञा क्रियते। ततः अपादानमित्यत्र कारकग्रहणमनुवर्तते ध्रुवमपाय इति च। तेन कारकं सदपादानसंज्ञमित्येवं समावेशः सिध्यतीति भावः। तेरणाप्यनुवृत्तिं वचनसामर्थ्यात्पर्याये [illegible] सिद्धसमावेशार्थानुवृत्तिर्विज्ञायते। एवं संप्रदानादिसंज्ञास्वपि समावेशो व्याख्येयः। समावेशस्य च प्रयोजनं संवेर

महत्यादावधिकरणत्वात्सप्तमी। कारकत्वात् कृदन्तस्योत्तरपदस्य प्रकृतिस्वरः॥ ॥श्रीः॥ ॥

शिवः

© Dharmartha Trust J&K. Digitized by eGangotri

अथेति। प्राग्ग्रहणद्वारेणावधिनिर्देशश्चोपपद्यते। निपाताइत्येवास्तु यथाप्रसङ्गइत्यादिरधिकारो विनाप्यवधिनिर्देशेनाभिमतविषये प्रवर्त्तते तथायमपि प्रव र्त्तिष्यते इति भावः। निपातसंज्ञामिति। चादिषु प्रादिष्वप्याक्रियायोगे विकल्पितगतिसंज्ञाविषयेषु साक्षात्प्रभृतिषु च गतिसंज्ञाभावपक्षे सावकाशा निपा तसंज्ञा गत्यादिसंज्ञाभिर्बाध्येतेत्यर्थः। क्रियमाणइति। ईश्वरादिति पंचम्याप्राक् शब्दाध्याहारे रलभ्ये पुनः श्रुतिप्राग्ग्रहणं संपद्यते। परशब्दाध्याहारेण रूपं च प्रतीन भविष्यति। चादयोऽसत्त्वे इत्यादिनाम संबद्धत्वप्रसंगात्। तंत्रेणैव वा द्वौ प्राक् शब्दावुच्चार्येते। तेनायमर्थः। प्राग्रीश्वरात् येऽव्यवस्थिता स्ते प्रा ग्निपातसंज्ञा भवंतीति निपाताः संतो गत्यादिसंज्ञा इति समावेशः सिद्धः। केवलेतु निपाताइत्यधिकारे क्रियमाणे सत्यामपि प्रातिपदिकमनुवृत्ताबेकसं

अनवकाशा

अथ प्राग्वचनं किमर्थं। प्राग्वचनं संज्ञाऽनिवृत्त्यर्थं। प्राग्वचने क्रियमाणे निपातसंज्ञाया अनिवृत्तिर्यथा स्यात्। अक्रिय माणे हि प्राग्वचनेऽनवकाशाः गत्युपसर्गकर्मप्रवचनीयसंज्ञाः निपातसंज्ञां बाधेरन्। ता मा बाधिषतेति प्राग्वच नं क्रियते। अथ क्रियमाणेपि प्राग्वचने यावता एताः संज्ञाः कस्मादेव न [redacted] बाधंतइति। क्रियमाणे हि प्राग्व चने सत्यां निपातसंज्ञायामेताः अवयवसंज्ञा आरभ्यंते तत्र वचनात्समावेशो भविष्यति॥ ॥चादयोऽसत्त्वे॥ ॥ अयं सत्त्वशब्दः अस्त्येव द्रव्यपदार्थकः। तद्यथा। सत्त्वमयं ब्राह्मणः सत्त्वमियं ब्राह्मणीति। अस्ति क्रियापदार्थकः। सद्भावः सत्त्वमिति। कस्येदं ग्रहणं। द्रव्यपदार्थकस्य। कुतएतत्। एवं कृत्वा विधि

त्वधिकारात्पर्यायः स्यान्नतु समावेशः। अवयवसंज्ञा

इति। विशिष्टावधिपरिच्छिन्नस्य समुदायस्यांतराल पतिता गत्यादिसंज्ञा आज्ञोऽवयवाभवंतीति तेषां संज्ञाइत्यर्थः॥ ॥चादयोऽसत्त्वे॥ ॥अयमिति। अर्थद्वये पि सत्त्वशब्दस्य प्रयोगदर्शनाद्विशेषावगतौ प्रमाणानुपलंभात्प्रश्नः। तत्र सीदंत्यस्मिन् जातिगुणक्रिया इति सत्त्वं द्रव्यमुच्यते। यदा तु सतो भा वः सत्त्वमिति तदा साध्यमानतया क्रियारूपापन्ना सत्ता सत्त्वशब्देनोच्यते। एवं च कृत्वेति। यदि सत्त्वशब्देन सत्तोच्येत तदा प्रतिषेधोऽनर्थकः स्यात्। नहि चादिषु सत्तावाची कश्चिच्छब्दोस्ति पदर्थो निषेधः स्यात्। पश्चैव पुरुषइत्यत्र च निपातसंज्ञा स्यात्। चायनुकरणानां वः पठितो दिर्यस्मात् पदिहता। द्रव्यपि विधिनिषेधौ यथाभिमत विषयौ न व्यवतिष्ठेयातां। द्रव्यग्रहणे तु व्यवतिष्ठेते। द्रव्यशब्देन चात्र सिद्धावस्थापन्नं वस्त्वभिधीयते। तदुक्तं। वस्तूपलक्षं

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰के॰ किंपुनरिति। उभयथाशास्त्रदर्शनात्प्रश्नः॥ विप्र इति। विप्रातीति विप्रः। आतश्चोपसर्गे इति कप्रत्ययांतः। क्रियोपसर्जनद्रव्यवाचित्वात्केवलाद्द्रव्यात्
क्रियाद्रव्यसमुदायस्यान्यत्वाद्द्रव्यादन्यस्मिन्नर्थे वर्त्तते। प्रादिभिरिति। निपातत्वेनाभिमतैः। सामान्यमिति। सारूप्यं। तदंतविधिनेति। न कुवि
ग्रेष्या संनिधानात्कथं तदंतविधिः। एवं तर्ह्ययमर्थः। निपातस्य संज्ञा निपातसंज्ञा। सा चाव्ययसंज्ञा। तस्यां चाश्रितं तदंतविधिः। प्रयोजनं सर्वनामा
व्ययसंज्ञायामिति। तत्र विप्रशब्दे प्रशब्दस्य निपातसंज्ञायां यथा परमोच्चैरिति स्वरः एवं तस्याव्ययसंज्ञा भवत्येवं निपातांतस्यापि स्यात्। ततो लु
क्प्रसज्येत। विप्रकंबल इत्यत्र च निपातांतस्य पूर्वपदप्रकृतिस्वरः स्यात्॥ ॥प्रादयः॥ ॥यद्यप्रागेव प्रादय इति योगो विभज्यते तदा प्रयोजनक

किंपुनरयं पर्युदासः [redacted] यदन्यत्सत्त्ववचनादिति आहोस्वित्प्रसज्यायं प्रतिषेधः सत्त्ववचनेनेति। किंचातः। यदि
पर्युदासः विप्र इत्यत्रापि प्राप्नोति। क्रियाद्रव्यवचनोयं संघातः। द्रव्यादन्यश्च विधिना आश्रीयते। अस्ति च प्रादि
भिः सामान्यमिति कृत्वा तदंतविधिना निपातसंज्ञा प्राप्नोति। अथ प्रसज्य [redacted] प्रतिषेधः न दोषो भवति। यथा
न दोषस्तथास्तु॥ ॥प्रादयः॥ प्रादय इति योगविभागः। प्रादय इति योगविभागः कर्त्तव्यः। प्रादयोऽसत्त्ववच
ना निपातसंज्ञा भवंति। ततउपसर्गाः क्रियायोगे इति। किमर्थो योगविभागः। [redacted] निपातसं
ज्ञार्थः। निपातसंज्ञा यथा स्यात्। एकयोगे हि निपातसंज्ञाभावः। एकयोगे हि निपातसंज्ञाया अभावः स्यात्
यस्मिन्नेव विशेषे गत्युपसर्गकर्मप्रवचनीयसंज्ञास्तस्मिन्नेव विशेषे निपातसंज्ञा स्यात्॥

शिवः

॥यत्नायवार्त्तिकं। यदा तु प्रादय उपसर्गाः क्रियायोगे इत्येको योगः पठ्यते तदा योगविभागः कर्त्तव्यत्वेन चोद्यते। एकयोगे हीति। अक्रियायो
गे निपातसंज्ञा न स्यात्। क्रियायोग एव तु गत्युपसर्गसंज्ञावत्स्यात्। तत तश्च प्रगत आचार्यः प्राचार्य इत्यत्र पूर्वपदप्रकृतिस्वरो न स्यात्। २
यस्मिन्नेवेति। कर्मप्रवचनीयसंज्ञास्तुः पूजायामित्यादिभिर्योगैः प्रादीनां विहिता॥

© Dharmartha Trust J&K. Digitized by eGangotri

मरुद्दन इति। प्रक्रियायां रूपमिदं न लौकिकमिदमुपात्तं। तत्वे न हि निसंभाव्यं। उपसर्गसंज्ञैव चास्मेष्यते तेन न निपातसंज्ञा। तस्यादिस। यानि पनाआद्यु-
दात्ताइत्याद्युदात्तत्वं ततो याकर्मणीति पूर्वपदप्रकृतिस्वरेण स्यात्। अंतोदात्तश्च मरुच्छब्द इष्यते। अभ्यपसंज्ञा च स्यात्। तत एवोपसर्गसंज्ञेष्यते। अ-
नभिधानाद्धि किंचिदुन भवति। संज्ञावचनसामर्थ्याद्यानजं तेन विनत्वं प्रवर्तते। अनेन तु न्यायेन मरुत्वन्तीति वर्ग्यपवाये णत्वं प्राप्नोति। तस्मा-
त्तस्य एवोपसर्गसंज्ञा वक्तव्या। प्रकारान्तरेणापि मरुत इति पुल्लादयिष्यते तपर्वमरुच्छापिति। अच्छब्दस्येति। तेन भिदादिकृष्ण्ड न शब्देन पठितव्यो

मरुच्छब्दस्योपसंख्यानं। मरुच्छब्दस्योपसंख्यानं कर्त्तव्यं। मरुद्दृ नो मरुत्तः। अचउपसर्गादिति तत्वं यथास्यात्। अच्छ-
शब्दस्योपसंख्यानं। अच्छशब्दस्योपसंख्यानं कर्त्तव्यं। अच्छ॥ ॥गतिश्च॥ ॥कारिकाशब्दस्य। कारिकाशब्दस्योपसंख्यानं कर्त्तव्यं।
पुनश्चनसो छंदसि। पुनश्चनसो [redacted] छंदसि गतिसंज्ञो भवत इति वक्तव्यं। पुनरुत्स्यूतं वासो देयं। पुनर्निष्कृतो र-
थः। उशिग्दूतश्चनोहित इति। गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रतीति वचनं। गत्युपसर्गसंज्ञाः क्रियायो-
गे यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञा भवंतीति वक्तव्यं। किं प्रयोजनं। प्रयोजनं षत्वणत्वे। षत्वं। विगताः सेव-
का अस्माद्ग्रामाद् विसेवको ग्रामः। उपसर्गादिति षत्वं मा भूत्। णत्वं। प्रगता नायका अस्माद्ग्रामात् प्रनायको ग्रामः। उपस-
भवति॥ ॥गतिश्च॥ ॥कारिकाशब्दस्येति। कारिका क्रियामर्यादास्थितिर्विसर्पः। यत्नभृत्यपरेय गर्दिति णत्वं मा भूत्॥ ॥ अ-
स्तु श्लोकवाची कारिकाशब्दस्तस्य ग्रहणं न भवति। क्रियायोगग्रहणेन कारिकाशब्दस्य विशेषणं क्रियावृत्तेर्ग्रहणात्। पुनश्चनसाविति।
ततश्च पुनरधेयमित्यत्र रूढं तोत्तरपदप्रकृतिस्वरेणायतो नाव इति धे पशब्द उदात्तः। पुनरुत्स्यूतमिति गतित्वात्समासः। स्वरस्तु प्रकृद्दे-
रकृतिगणत्वादंतोदात्तत्वं। चनोहित इति। निपातत्वादाद्युदात्तस्य चनः शब्दस्य गतिरनंतर इति प्रकृतिस्वरः। गत्युपसर्गसंज्ञे इति। क्रियायोग इति
सामान्येनोपादानाद्विशेषावधारणार्थं वचनं। अ

© Dharmartha Trust J&K. Digitized by eGangotri

वृद्धिविधौ चेति। उपसर्गत्वेव धातोः प्राक्प्रयोगात्। प्रछकः इति। प्रगता ऋच्छका अस्मादिति बहुव्रीहिः। तत्र धातुग्रहणस्य प्रयोजनं वक्ष्य
ते। उद्धृत इति। क्रियायोगे अस्याप्रयोगात् अनुपसर्गत्वाभावः। अनवकाशा इति। येषां हि क्रियायोगे प्रयोगे तं प्रत्युपसर्गसंज्ञा ते संप्रत्यनुपसर्गा अपि ग्र

वृद्धिविधौ च धातुग्रहणमनर्थकं। वृद्धिविधौ च धातुग्रहणमनर्थकं। उपसर्गादृति धाताविति। तत्र धातुग्रहणस्येतत्प्रयोज
नमिह मा भूत्। प्रर्षभं वनमिति। क्रियमाणे चापि धातुग्रहणे प्रर्च्छक इत्यत्र प्राप्नोति। यत्क्रियायुक्ताः तं प्रतीति वचनान्न
भवति। वहिर्धिनस्माभावावीतस्वांगादिस्वरणत्वेषु दोषो भवति। वहिर्धि। यदुद्धतो निवतो यासि बप्सत्। वहिर्धि। नस्
भाव। प्रणसं मुखं। उन्नसं मुखं। नस्माव। अवीत्व। प्रेपं परेयं। अवीता। स्वांगादिस्वर। प्राक्स्फिक् प्रोदरः। स्वांगादिस्व
रः। णत्व। प्रणाः शूद्रः प्रणा आचार्यः प्रणो राजा प्रणो वृत्रहा। उपसर्गादित्येते विधयो न प्राप्नुवन्ति। वहिर्धिनस्माभावावी
तस्वांगादिस्वरणत्वेषु वचनप्रामाण्यात्सिद्धं। अनवकाशा एते विधयस्ते वचनप्रामाण्याद्भविष्यन्ति। सुदुरोः प्रतिषे
धो नुम्विधितत्वषत्वणत्वेषु। सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु वक्तव्यः। नुम्विधि। सुलभं दुर्लभं। उपस
र्गादिति नुम् मा भूदिति। नस्सुदुर्भ्यां केवलाभ्यामित्येतन्न वक्तव्यं भवति। नैतदस्ति प्रयोजनं। क्रियत एतन्न्यास एव। 3
तत्व। सुदत्तं। अच उपसर्गादिति तत्वं मा भूदिति। षत्व। सुसिक्तं घटः शूलेन। सुस्तुतं श्लोकः शूलेन। उपसर्गादिति षत्वं शिवः
मा भूदिति। सुः पूजायामित्येतन्न वक्तव्यं भवति। नैतदस्ति प्रयोजनं। क्रियत न्यास एव। णत्व। दुर्नयं दुर्नीतं इति। उ

क्तं तदित्यर्थः। क्रियत इति। केवलाभ्यामिति विशेषणमभिधानार्थमवश्यं कर्त्तव्यं। तेनाभिसृतं अभिसृतं रूपसर्गत्वेन संभवत्येव। क्रियत इति। २
पूजायामिति विशेषणोपादानार्थं। तेन सुषिक्तं किं तवात्रेत्यादौ षत्वं भवत्येव॥

© Dharmartha Trust J&K. Digitized by eGangotri

[redacted]

ऊर्यादि॥ ॥ऊरीपत्कस्केति। प्रयोगापर्यालोचनेन संभवमात्राश्रयेणेतदुदाहृतं। नचान्ययेति। च्विडाचोस्तावत् कृभ्वस्तियोगएव विहितौ ऊर्यादयोपि कृभ्वस्तिविषया एव प्रयुज्यंते नान्यत्रेति॥ ॥अनुक॥ ॥कथमिति। द्वयोरपि समासयोः संभवाद्दोषदर्शनाच्च प्रश्नः। खाडितिकृत्वेति। गतिसंज्ञायां समासः स्यात्। धातोश्चानंतरं प्रयोगः इति रूपमेतन्न सिध्येत्। इतिखाट्कृत्वेति चैवं तत्र च निषेधप्रसंगः। श्रौषडिति। श्रौषट्शब्द इति परो न भवति वौषडावधाना

ऊर्यादिच्विडाचश्च॥ कृभ्वस्तियोग इति वक्तव्यं। इहैव यथा स्यात्। ऊरीकृत्य ऊरीभूय। इह मा भूत्। ऊरीपत्का। तत्त र्हि वक्तव्यं। न वक्तव्यं। क्रियायोग इत्यनुवर्तते। न चान्यया क्रियया ऊर्यादिच्विडाचां योगोस्ति॥ ॥अनुकरणं चानितिपरं॥ ॥कथमिदं विज्ञायते इतेः परमितिपरं न इतिपरमनितिपरमिति। आहोस्विदितिः परो यस्मात्तदिदमितिपरं न इतिपरमनितिपरमिति। किंचातः। यदि विज्ञायते इतेः परमितिपरं न इतिपरमनितिपरमिति खाडितिकृत्वा निरष्ठीवदित्यत्र प्राप्नोति। अथ विज्ञायते इतिः परो यस्मात्तदितिपरं न इतिपरमनितिपरमिति। श्रौषड्वौषडिति कृत्वा निरष्ठीवदित्यत्र प्राप्नोति। अस्तु तावदितिः परो यस्मात्तदितिपरं न इतिपरं न इतिपरमनितिपरमिति। ननु चोक्तं श्रौषड्वौषडिति कृत्वा निरष्ठीवदित्यत्र प्राप्नोतीति। नैष दोषः। इदं तावदयं प्रष्टव्यः। अथ यत्ते प्राग्धातोरिति कथं गतिमात्रस्य पूर्वप्रयोगो भवति उपोद्धरतीति। गत्या कृतिः प्रातिनिर्दिश्यते। इहापि तर्हि तु

इति गतिसंज्ञाप्रसंगः। ननु व्यवहितेपि परशब्दस्य दर्शनात् भवत्येवेति परत्वं। नैष दोषः। अ करणा कृतिः प्रातिनिर्दिश्यते। किमर्थमिदमुच्यते॥ मध्योवेन एवास्य मुख्यवृत्तिः। अन्यत्र त्वं तराल स्पमसमीप्याव्यवधानमेवाश्रित्य प्रयुज्यते। इह तु वौषटो व्यवधायकस्योच्चारणादयुक्तमनपेक्षणं। खाट्कृत्वेति निरष्ठीवदित्यत्रेति धात्वव्यवधानेपि प्रतिषेधप्रसंगात्। इदं तावदिति। यो अन्यथाश्रये एवाव्यवधानं मन्यते। गत्या कृतिरिति।
तस्याश्च भिन्नात्स्वपिव्यक्तिषु भिन्नायाना स्यत्र व्यवधानं। किमर्थमिति।

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰के॰

अनिष्टशब्दनिवृत्त्यर्थ इति। खाड् इति कृत्वेति प्रयोक्तव्ये इति खाट् कृत्येति प्रयोगः स्यात्। प्रयोगनियमे वायं दोषः। तत्र ह्ययमर्थः। गत्युपसर्गसंज्ञा धातोः प्रा
गेव प्रयोक्तव्या इति ततो व्यवहितस्य प्रसंगः। संज्ञानियमे तु न दोषः। तेनैवानियमेन खाड् इति कृत्वेत्यत्र व्यवहितस्य संज्ञानिवारणाद् अस्य प्रयोगस्यासि
द्धत्वात्॥ ॥आदरे॥ ॥ कथमसत्कृत्येति। यदि न सत्कृत्यासत्कृत्येति नञ्समासः क्रियते तदा सति शिष्टत्वात् कृदुत्तरपदप्रकृतिस्वरं बाधित्वा ऽव्ययपूर्वप
दस्वरेणाद्युदात्तत्वं स्यात्। अथ न सदसदिति समासः क्रियते तदा सच्छब्दस्य विधीयमाना गतिसंज्ञा ऽसच्छब्दस्य न स्यादिति भावः। तदन्तविधिनेति।

अनुकरणस्येति करणपरत्वप्रतिषेधो ऽनिष्टशब्दनिवृत्त्यर्थः॥ अनुकरणस्येति करणपरत्वप्रतिषेध उच्यते। किंप्र
योजनं। अनिष्टशब्दनिवृत्त्यर्थः॥ अनिष्टशब्दतामात्रदर्शितः। इदं विचारयिष्यते। प्राग्धातुवचनं प्रयोगनियमार्थं वा स्यात् संज्ञा
नियमार्थं वेति। तत्र यदा प्रयोगनियमार्थं तदानिष्टशब्दनिवृत्त्यर्थमिदं वक्तव्यं। यदा हि संज्ञानियमार्थं तदा न दोषो भवति॥
आदरानादरयोः सदसती॥ ॥इदमतिबहु क्रियते आदरे अनादरे सत् असदिति। आदरे सदित्येव सिद्धं। कथमसत्कृ
त्येति। तदन्तविधिना भविष्यति। केनेदानीमनादरे भविष्यति। नञा आदरप्रतिषेधं विज्ञास्यामः। न आदरो ऽनादर इति। नै
वं शक्यं। आदरप्रसंगे एव स्यादनादरप्रसंगे न स्यात्। अनादरग्रहणे पुनः क्रियमाणे बहुव्रीहिरयं विज्ञायेत। अविद्यमा
नादरे ऽनादरे इति। तस्मादनादरग्रहणं कर्त्तव्यं। असत्कृत तदन्तविधिना सिद्धं॥ वक्तव्यं। तत्रानादरे सच्छब्दस्य...

यद्यपाह प्रकृतं विशेष्यं नास्ति तथापि कार्यार्थत्वात् संज्ञायाः कार्यप्रदेशेषु प्रकृतस्य गतिना विशेषणात् तदन्तविधिर्भवति। तत्र समासे च धोक्तु बिति प्र
कृतं गतिरनन्तर इत्यत्र पूर्वपदं गतिर्गतावित्यत्र पदस्येति। अव्ययसंज्ञायामस्यैव तदन्तविधिः। न आदर इति। अनेनासच्छब्दस्यानादरार्थत्व
मिति तां दर्शयति। न तस्यानादरग्रहणेन यत्साध्यं तदन्यथापि सिध्यतीत्येवं परमेतत्। आदरप्रसंग इति। गुरूनसत्कृत्येत्यादौ तु स्यात्। पारक्यं
डिनमसत्कृत्येत्यादौ तु न स्यात्। तथा हि अब्राह्मण इति क्षत्रियादिरेवोच्यते न तु गोलोष्टादिः। बहुव्रीहिरिति। स चात्यन्ताभावे ऽपि प्रसक्तस्य भावे भवतीति सर्वत्र

शिवः ५

© Dharmartha Trust J&K. Digitized by eGangotri

ध्रुवमपाये॥ ॥ध्रुवग्रहणमिति। अध्रुवस्य परत्वात्संज्ञान्तरं प्रवर्त्तेत्यत इ[illegible]ति प्रश्नः। शकटेनेति। अपाये शकटस्यापि साधनत्वादपादानसंज्ञाप्राप्ता
ति। करणसंज्ञेति। यथा धनुषा विध्यतीति क्रियमाणेऽपि ध्रुवग्रहणे परत्वात्करणसंज्ञा भवति एवमक्रियमाणेऽपि शकटस्यापि भविष्यतीत्यर्थः। इदं तर्हि
ति। ननु कंसपात्र्यां साधनमेवागमनेन भवति भुजिक्रियायां तु साधनं ध्रुवा च तत्र परत्वादधिकरणसंज्ञेति कडारसूत्रे उक्तं। एवं तर्हि वस्तुस्थि
त्या गमने [illegible] प्रधानं तदङ्गं तु भोजनं शब्दात्तु विपरीतो गुणप्रधानभावः प्रतीयते। तदुक्तं हरिणा। चंक्रम्यमाणोऽधीयानः जपंश्चंक्रमणं कुरु
तादर्थ्यात्स्याविशेषेऽपि शब्दाद्भेदः प्रतीयत इति। तत्र कंसपात्री भुजेः साधनत्वात्तद्द्वारेणागमनस्यापि भवत्येव साधनं अत्रापीति। शब्देन तोजा

ध्रुवमपायेऽपादानं॥ ध्रुवमिति किमर्थं ग्रामादागच्छति शकटेन। नैतदस्ति। करणसंज्ञात्र बाधिका भवि
ष्यति। इदं तर्हि ग्रामादागच्छन् कंसपात्र्यां पाणिनौदनं भुंक्त इति। अत्राप्यधिकरणसंज्ञा बाधिका भविष्यति।
इदं तर्हि वृक्षस्य पर्णं पतति कुड्यस्य पिंडः पततीति। जुगुप्साविरामप्रमादार्थानामुपसंख्यानं। जुगुप्साविरा
मप्रमादार्थानामुपसंख्यानं कर्त्तव्यं। जुगुप्सा॥ अधर्माज्जुगुप्सते। अधर्माद्बीभत्सते। अधर्माद्विरमति।
अधर्मान्निवर्त्तते। प्रमादः। धर्मात्प्रमाद्यति। धर्मान्मुह्यति। इदं चोपसंख्यानं कर्त्तव्यं। सांकाश्यकेभ्यः पाट
लिपुत्रका अभिरूपतरा इति। तत्तर्हि दं बहु वक्तव्यं।

तस्यैव[illegible] ध्रौव्यं प्रतीयते [illegible] इति तत्प्रयुक्तेभ्ये
वसंज्ञया भाव्यं। यथा भोक्तुं ग्राममभिनिविशत इति प्रधानक्रियापेक्षया ग्रामस्य कर्मसंज्ञा भवति न तु भुजापेक्षयाऽधिकरणसंज्ञा। वृक्षस्येति। अ
स्यत्रापाय इति भावः। नन्वत्र कारकत्वाभावात्संज्ञा न भविष्यति अपायाभावाच्च। सस्यैव ध्रुवधावपायो भवतीति। [illegible] पूर्वसूत्रे उक्तत्वात्। तत्र के
चिदाहुः। स्वज्ञानत्वात्पूर्वसूत्रे उक्तत्वाच्च भाष्यकारेण प्रयत्नो नोक्तः। अन्ये त्वाहुः। सतीह ध्रुवग्रहणे विश्लिष्टोपायो लभ्यते असति तु तस्मिन्
पातमात्रस्य लोकेऽपायत्वेन प्रसिद्धत्वात्कारकाधिकारानपेक्षया च प्रत्यक्षदारुणामुपन्यस्तं। जुगुप्सेति। संश्लेषपूर्वको विश्लेषोऽपायः। स चात्र ना
स्ति। बुद्धिकल्पितस्तु गौण इति भावः। कारकशेषत्वाच्चात्र षष्ठी प्राप्नोति। यथा नटस्य शृणोतीति। सांकाश्यकेभ्य

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰के॰ नवक्रव्यमिति। साधकतमं करणमितितमप्ग्रहणेन स्वरितेनाधिकार इत्यधिकः कारोऽधिकार इत्यस्यार्थस्याश्रयणेन च बुद्धिव्यवस्थितापा
याश्रया उपादानसंज्ञा प्रवर्त्तते। अधर्माज्जुगुप्सत इति। जुगुप्सादयो निवृत्त्यंगे जुगुप्सादौ वर्त्तन्ते। संभिन्नबुद्धिरिति। धर्माधर्मयोरेकाकारबु
द्धिर्नास्तिक इत्यर्थः। यस्तैरिति। तैः सांकाश्यकेभ्यः पाटलिपुत्रकाणां समगुणत्वाद्यः साम्यं गतवान् स प्रकर्षाश्रयेण पुनः पृथक्कृत्वा वाक्यं
प्रयुंक्त इत्यर्थः। त्रिविधं चेदमपादानं। निर्दिष्टविषयमुपात्तविषयमपेक्षितक्रियं चेति। तत्र निर्दिष्टविषयं। यत्र धातुनापायलक्ष

5

नवक्रव्यं। इह तावदधर्माज्जुगुप्सते अधर्माद्बीभत्सते इति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति
दुःखोऽधर्मो नानेन कृत्यमस्तीति। स बुद्ध्या संप्राप्य निवर्त्तते। तत्र ध्रुवमपायेऽपादानमित्येव सिद्धं। इह अ
धर्माद्विरमति अधर्मान्निवर्त्तते इति। धर्मात्प्रमाद्यति धर्मान्मुह्यतीति। इह य एष मनुष्यः [redacted]
संभिन्नबुद्धिर्भवति स पश्यति नेदं किंचिद्धर्मो नाम नैनं करिष्यामीति स बुद्ध्या संप्राप्य निवर्त्तते। तत्र ध्रु
वमपायेऽपादानमित्येव सिद्धं। इह च सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति य एषः साम्यं ग
तवान् भवति स एतत्प्रयुंक्ते। गतियुक्तेष्वपादानसंज्ञा नोपपद्यतेऽध्रुवत्वात्। गतियुक्तेष्वपादानसंज्ञा
नोपपद्यते। रथात्प्रवीतात्पतितः। अश्वात्त्रस्तात्पतितः। सार्थाद्गच्छतो हीन इति। किं कारणं। अध्रुवत्वात्॥

णं विषयो निर्दिष्टः यथा ग्रामादागच्छतीति। उपात्तविषयं। यत्र धातुर्धात्वंतरस्यांगं स्वार्थमाह। यथा बलाहकाद्विद्योतत इति। निःसरणांगे द्योत शिकुः
ने धातुर्वर्त्तते। यथा वा कुसूलात्पचतीति स्थाल्यादावादानांगे पाके पचिर्वर्त्तते। अपेक्षितक्रियं। यत्र क्रियावाचिपदं न श्रूयते केवलं क्रिया प्रती
यते। यथा सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति। गतियुक्तेष्विति। अचलं ध्रुवमेकरूपं चेति परिस्पंदे ध्रुवता नास्तीति मन्यते। ५
अश्वात्त्रस्तादिति। त्रासपूर्वके परिस्पंदेऽनेकार्थत्वाद्धातूनां त्रसिर्वर्त्तते। त्रस्तश्चाश्वः पातस्य निमित्तमिति एवमश्वस्य त्रस्तत्वेन संबंधः प

© Dharmartha Trust J&K. Digitized by eGangotri

नवेति। अयमर्थः। ध्रुवमेकरूपमुच्यते। तच्च ध्रौव्यमपायविषयमाश्रयते न त्वनवच्छिन्नं। ततोऽपायेन यदनाविष्टं तदपाये ध्रुवमुच्यते। देवदत्तकर्तृके च पाते त्वश्व
स्याप्यश्वस्यापायावेशात् ध्रुवत्वं। देवदत्तस्यैवापायावेशाद् ध्रुवत्वं। अथवाश्वस्यात्र सतो यद् ध्रौव्यं तत्प्रथममविवक्षितं इत्यर्थः। तथाहि। कारकस्य
पूर्वं क्रियासमन्वयः। स च श्रुतिप्रापित उच्यते। पश्चाद्विशेषणेन वाक्यीयः संबंधः। ततश्चाश्वात्पतित इति संबंधे नास्त्यश्वस्याध्रुवत्वं। पश्चात्तु तस्य ते
न संबंधे सत्यपि अध्रौव्यं तरंगास्संज्ञा न निवर्त्तते। विशेषणस्य सत्यप्यपादानत्वे सामयिकी [illegible] विभक्तिः। सा च विशेष्यानुरोधेन प्रवर्त्त
ते न त्वनियमेन। अथवाश्वस्य तस्याप्यपादानत्वं। सत्यपि चासोपेसेऽध्रुवत्वे पातं प्रति ध्रुवत्वात्। यथोक्तं प्राक्। आत्मगामि त्वमिति। अयमर्थः। यु

न वाध्रौव्यस्याविवक्षितत्वात्। न वा एष दोषः। किं कारणं। अध्रौव्यस्याविवक्षितत्वात्। नात्राध्रौव्यं विवक्षि
तं। किं तर्हि ध्रौव्यं। इह तावदश्वात्त्रस्तात्पतित इति यत्तदश्वेऽश्वत्वमात्मगामित्वं तद्ध्रुवं तच्च विवक्षितं। र
थात्प्रवीतात्पतित इति। यद्रथे रथत्वं रमन्तेऽस्मिन् रथ इति तद्ध्रुवं तच्च विवक्षितं। सार्थाद्गच्छतो हीन इ
ति यत्तत्सार्थे सार्थत्वं सहार्थीभावः तद्ध्रुवं तच्च विवक्षितं। यद्यपि तावदत्रैतच्छक्यते वक्तुं। ये त्वेते त्यन्त
गतियुक्तास्तत्र कथं। धावतः पतितः त्वरमाणात्पतित इति। अत्रापि न वाऽध्रौव्यस्याविवक्षितत्वादित्येव
कथं पुनः सतो नामाविवक्षा स्यात्। सतोऽप्यविवक्षा भवति। तद्यथा।

त्तिमात्रमात्मगामित्वमिति तदपेक्षयाऽध्रौव्यं नापूं
कनीयं। जातिरेव शब्दप्रवृत्तिनिमित्तमिति नास्त्यत्राध्रौव्यं। आत्मगामित्वशब्देन कार्यसमवायात्साहचर्याद्भवत्वमेवोच्यते। यद्यपीति। यत्र
क्रिया न प्रवृत्तिनिमित्तं किं तु व्युत्पत्तिमात्रं निमित्तं तत्रैतद्वक्तुं युज्यते। यत्र तु शब्दप्रवृत्तिनिमित्तं क्रिया तत्र कथं नाध्रौव्यमिति प्रश्नः। अ
त्रापीति। सरणक्रियोपलक्षितं द्रव्यमात्रमपादानत्वेन विवक्षितं। न च देवदत्तकर्तृके पाते पूर्वोक्तन्यायाद्ध्रुवत्वेनेत्यर्थः। कथं पुनरि
ति। शब्दोपात्तमपि सरणं द्रव्योपलक्षणार्थत्वाद् ध्रौव्यनिमित्तं न भवतीति कुत एतदिति

© Dharmartha Trust J&K. Digitized by eGangotri

मा.के. अलोमिकेति। अल्पत्वाल्लोम्नां तत्कार्याकरणादेवमुच्यते। असतश्चेति। निदर्शनार्थमिदमुच्यते यथाऽसतो विवक्षा भवति एवं सतोऽप्यवि
वक्षेत्यर्थः। समुद्रः कुंडिकेति। कुंडिका यां पानीयं वा कुल्या तत्समुद्रत्वं विवक्षितं। समुद्रस्य वा स्वतरत्वात्कुंडिकात्वं। विंध्यो वर्द्धितकमिति।
पूर्ववदन्यतररूपारोपेण व्याख्येयं। मेषो मेषादपसर्पति। तत्रैकस्य मेषस्य कर्त्तृत्वविवक्षा अपरस्यावधिविवक्षा। यदा तु मेषावपसर
त इति प्रयोगस्तदाऽवध्यंतरमपेक्षणीयं। ॥ भीत्रार्थानां॥ ॥ कथमिति। भयप्राकुलीभावः त्राणमन [redacted] र्थप्रतिघात इति [redacted] तत्र
च नास्ति मुख्योऽपाय इ [redacted] ति प्रश्नः। प्रेक्षापूर्वकारीति। बुद्धिपूर्वकस्थितोऽपायोऽस्तीति भावः। तत्र निवृत्त्यंगो भयविनेत्यादयो वर्त्त

अलोमिका एडका। अनुदरा कन्येति। असतश्च विवक्षा भवति। समुद्रः कुंडिका। विंध्यो वर्द्धितकमिति॥ ॥भीत्रा
र्थानां भयहेतुः॥ ॥अयं योगः शक्योऽवक्तुं। कथं वृकेभ्यो बिभेति दस्युभ्यो बिभेति चोरेभ्यस्त्रायते दस्युभ्यस्त्रा
यत इति। इह तावद्वृकेभ्यो बिभेति दस्युभ्यो बिभेतीति य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति
यदि मां वृकाः पश्यंति ध्रुवो मे मृत्युरिति स बुद्ध्या संप्राप्य निवर्त्तते तत्र ध्रुवमपायेपादानमित्येव
सिद्धं। इह चोरेभ्यः [redacted] स्त्रायते दस्युभ्यस्त्रायत इति य एष मनुष्यः प्रेक्षापूर्वकारी स इह भवति स प
श्यति यदीमं चोराः पश्यंति ध्रुवमस्य वधबंधनादिपरिक्लेश इति स बुद्ध्या संप्राप्य निवर्त्तयति तत्र प२

त इति उपात्तविषयमेतदपादानं। चोरेभ्यस्त्रायत इत्यस्यार्थः परिहाराय निवर्त्तयतीत्यर्थः। चोर ध्रुवमपायेऽपादानमित्येव सिद्धं।
मध्यगतस्यापि त्राणे चोरसंपर्कफलस्य वधबंधनापहरणादेर्निवर्त्तनात्तेभ्यो निवर्त्तयतीत्यु [redacted] च्यते। वारणार्थानामीप्सित इत्यने शिव:
नाऽपादानसंज्ञा न प्राप्नोति। चोराणामनीप्सितत्वात्। सत्यां भपक्षे तु कारकशेषत्वात् षष्ठीं प्राप्तायामिदं वचनं॥ ॥ ॥ ॥शुभम्॥ ६

© Dharmartha Trust J&K. Digitized by eGangotri

नन्वेति। न हि विघमाने लुकमाचार्यो न्वाचष्टे अपि त्वर्थस्याभावात्त्वनएवयाशब्दस्य निवृत्तिः सैवानुमन्यतइत्यर्थः॥ अर्थकृतेनेति। प्रत्यायियिपितार्थस्य प्रतिपा
दनाय शब्दप्रयोगात्। अर्थरूपमिति। अर्थस्वभावः। एतदुक्तं भवति। संख्याविशेषादियुक्तवस्तुप्रतिपादने छायां वा वं प्रयुज्यते अन्यदा तु हृत्तिः। गोषुचर
इति। गोषुचरः कुक्कुट उच्यते। एकसंगाविहृयो बहुषु वा यश्चरति स सर्वो ——— साव। विशेषेणोच्यते। ज्ञातो चेदं बहुवचनमिति व्यक्तिगत
संख्याभेदानवगमः। यदि तु व्यक्तिगतं बहुत्वं प्रतीयेत तत स्तदाश्रयमेव बहुवचनं क्रियेत। यदा तु सत्यपि बहुवचने व्यक्तिबहुत्वं न प्रतीयते तदा ज्ञा
त्याश्रयं बहुवचनं अभ्युपगम्यते। वर्षासुज इति। इंद्रगोपः। तत्राप्येकस्मिन पृतो अवयवबहुतापेक्षा बहुवचनान्तो वर्षाशब्दो वर्त्तते न तत्र वक्तु बहु

ननु चैते ते नैवं भवितव्यं। न हि शब्दकृतेन नामार्थेन भवितव्यं। अर्थकृतेन नाम शब्देन भवितव्यं। तदेतदेवं दृश्यतां।
अर्थरूपमेवं ज्ञातीयं येनात्र विशेषो न गम्यत इति। अवश्यं चैतदेवं विज्ञेयं। यदि मन्यते यो सौ विशेषवाची शब्दस्त
दसान्निध्यादत्र विशेषो न गम्यत इति। इह तस्य विशेषो गम्येत। अक्षुचरो गोषुचरो ——— वर्षासुज इति। व्यक्ताभि
धानं वाक्ये। ब्राह्मणस्य कंबलं तस्तिष्ठतीति। समासे पुनरव्यक्ताभिधानं ब्राह्मणकंबलस्तिष्ठतीति। संदेहो भवति। सं
बुद्धिर्वा षष्ठीसमासो वेति। एषोप्यविशेषः। भवति हि किंचिद्वाक्ये व्यक्तं न च समासे व्यक्तं। वाक्ये तावद्व्यक्तं। भर्द्र
पशोर्द्देवदत्तस्येति संदेहो भवति पश्चुगुणास्य देवदत्तस्य इं। अपवायो सौ ———
तं प्रतीयत इत्यत्राप्यभेदैकसमुपजायते। तत्पुरुषे र्नामतस्य पदर्द्धमिति। तत्र समासे व्यक्तं भ
ति बहुलमित्यत्रालुकू। लिंगविशेषस्यापि क्वचिद्धत्तावुपादानं कुमारीपुत्र इति। क्वचित्यागः। कुक्कुटांडं मृगमांस
मिति। वाक्ये पिजात्येतरनिवृत्तिपरे लिंगविशेषावि वक्षादृश्यते छागस्य मांसमिति। ब्राह्मणकंबल इति। यद्यपत्र स्वराल्लिर्णयस्तथापि शब्दरूपमात्राल्लिश्च
याभाव इति वं परमेतत्। यत्रापि नास्ति स्वरभेदः संबुद्धिषष्ठीसमासयोस्तिष्ठति ब्राह्मणकंबल इत्यादौ तत्रापि प्रकरणादिवशाद्व्यक्ति निश्चयेन भाव्यं केव
लशब्दाद्यतादित्याल्लिपातनाद्यं तो दान्तः। एकार्थीभावे सति भेदनिबंधनसंबंधाघिविभक्ति निवर्त्तनात्तलो विशेषो। व्यक्ताभिधानमुच्यते। एवापीति। व्यभि
चारादपि शब्दः सुबलोपापपेक्षया समुच्चयार्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

ऋद्धस्येति। राज्ञा स्वार्थादप्रच्युतः पदार्थान्तरमप्रतिपन्नो वाक्ये योग्यत्वाद्विशेषणसंबंधमनुभवतीति। वृत्तौ तूपसर्जनीभूतस्वार्थमर्थान्तरं च प्रत्याययता निःस
योग्यत्वाद्विशेषणेन न संबध्यते। एषोपीति। अव्यापित्वात्। चयोग इति। वाक्ये पदार्थानां भिन्नत्वादिदमियं च न समुच्चयद्योतनाय च शब्दः प्रयुज्यते। वृत्तौ
तु समस्तैकलक्षणैकार्थप्रादुर्भावाद्द्वन्द्वस्य निवर्तनाद्द्योत्यार्थाभावाद्द्योतकस्यापि चशब्दस्य निवृत्तिः। अथैतस्मिन्निति। अयं भावः। यदि वाचनिकमर्थाभि
धानं तदा सत्यप्येकार्थीभावे चार्थे द्वंद्वविधानाद्द्वंद्वेनैव चार्थस्योक्तत्वाच्चस्याप्रयोगोऽन्यथासिद्धत्वान्नानुमानमेकार्थीभावस्य। स्वाभाविके तु चार्थे द्व

उपसर्जनविशेषणं भवति। ऋद्धस्य राज्ञः पुरुष इति। समासे न भवति। राजपुरुष इति। एषोऽपि विशेषः। समासेऽप्युपस
र्जनविशेषणं भवति। तद्यथा। देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रो देवदत्तस्य दासभार्येति। चयोगो भवति वाक्ये।
स्वचयोगः स्वामिचयोग इति। कस्य चयोगः। राज्ञो गौश्चाश्वश्च पुरुषश्चेति। समासे न भवति राजगवाश्वपुरुषा इ
ति। स्वामिचयोगः। देवदत्तस्य यज्ञदत्तस्य विष्णुमित्रस्य च गौरिति। समासे न भवति। देवदत्तयज्ञदत्तविष्णुमि
त्राणां गौरिति। अथैतस्मिन्नेकार्थीभावकृते विशेषे किं स्वाभाविकं शब्दैरभिधानमाहोस्विद्वाचनिकं। स्वाभावि
कमित्याह। कुत एतत्। अर्थानादेशनात्। न ह्यर्था आदिश्यन्ते। कथं पुनरर्थानादेशनादेवंजातीयका अर्था आदिश्यन्त इति
यदाह भगवान्। अनेकमन्यपदार्थे। चार्थे द्वंद्वः। अपत्येऽर्थे के निर्दिश्यत इति। नैतान्यर्थादेशनानि। स्वभावतस्तेषां
शब्दानामेतेष्वर्थेष्वभिनिविष्टानां नि

त्यादिनिर्देशो ... ऽनर्थकः। अर्थानादेशनादिति। अचतुरविचतुरेत्यादाविति भावः। आदिश्यन्त इति। प्र
वृत्ताविदमेव लक्षणं वर्तमानत्वेन ... प्रबंधानुपरमाद्दर्शयति। वाक्ये नैव चार्थादेशनं मन्यते। सुबंतमन्यपदार्थे वर्तते तच्च बहुव्रीहिसंज्ञमित्यन्य
त्रापि वाक्यभेदो दर्शनीयः। यदा तु लोकप्रसिद्धार्थानुवादेन बहुव्रीहिसंज्ञा विधीयते यदन्यपदार्थे वर्तते तद्बहुव्रीहिसंज्ञमिति तदानार्थादेशनेन
नापि वाक्यभेदः। अर्थेष्वभिनिविष्टानामिति। अभिनिविशश्चेत्यत्र परिक्रयण इत्यतोऽन्यतरस्यांग्रहणानुवर्तनाद्विकल्पेन कर्मसंज्ञाविधानात्स
प्तमी कृता। एतदेव च भाष्यकारवचनं लिंगं तद्विकल्पस्य।

शिवः

७

© Dharmartha Trust J&K. Digitized by eGangotri

कूप इति। कूपो लक्षणत्वेनोपादीयते ह्रस्वदक्षिणमार्गस्य ग्रहणस्य। अत्र दृष्टत्वात्प्रथमं चन्द्रमसो चन्द्रमसो लक्षणत्वेन निर्दिश्यते। किं पुनरिति। प्रकृतिप्रत्ययोपदेशवद्वचनं वाक्यभेदेनार्थादेशनमिति भावः। लघ्वर्थमिति। लघुशब्दो लाघवे वर्तते। लाघवार्थमर्थो नादिश्यते। अन्यथा गौरवमनवस्था च प्राप्नोति। तथा हि। यदि वार्थे वर्तते अनेकं तत्र द्वंद्वसंज्ञमिति वाक्यभेदेनार्थादेशनं क्रियते तदेवं प्रष्टव्यं स्यात् कः पुनरर्थः। तत्राचार्येण वक्तव्यं स्यात् समाहार इतरेतरयोगश्च। ततः कः समाहारः क इतरेतरयोग इति प्रश्नप्रतिवचनयोरनवस्था गौरवं चा

तद्यथा। कूपे ह्रस्वदक्षिणः पन्थाः। अत्र चन्द्रमसं पश्येति। स्वभावतस्तत्रस्थस्य पश्यतश्चन्द्रमसश्च निमित्तत्वेनान्वाख्यानं क्रियते। एवमिहापि वार्थे यः स द्वंद्वः। अन्यपदार्थे यः स बहुव्रीहिरिति। किं पुनः कारणमर्थो नादिश्यते। न च लघ्वर्थं। लघ्वर्थं ह्यर्थो नादिश्यते। अवश्यं ह्यनेनार्थानादिशता केनचिच्छब्देनार्थनिर्देशः कर्तव्यः स्यात्। तस्य चतावत्केनकृतः येनासौ क्रियते। अथ तस्य केनचित्कृतस्तस्य केन कृत इत्यनवस्था। असंभवः खल्वर्थादेशनस्य। कोऽहि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुं। न चैतन्मन्तव्यं प्रत्ययार्थे निर्दिष्टे प्रकृत्यर्थो निर्दिष्ट इति। भवति हि गुणाभिधाने गुणिनः संप्रत्ययः। तद्यथा। शुक्लः कृष्णः इति॥

नुपपद्यते। असंभव इति। असामर्थ्यादिति शेषः बाहुल्यात्प्रतिपादनाय वार्थादेशनस्य गौरवानवस्थासंभवाः परस्परं तथा वेदितव्या गुपन्यस्ताः। कोऽहीति। अनेकार्थता [illegible] दिति भावः। तत्र धातूनामनेकार्थत्वं कुर्द खुर्द गुर्द गुद क्रीडायामेवेति निपातार्थादेवं कारादिभ्यस्यते। प्रातिपदिकानामपि यथेष्टं विनियोगदर्शनादिना। शक्तिनियमे तु पुरुषस्य व्यापारः। प्रत्ययानां तु कल्प ल्युटो बहुलं शेषे घञ्। लिलक्षणे रत्नातः। निपातानामनेकार्थत्वं नानाविधस्यार्थस्य प्रयोगे द्योतनात्। न चैतन्मन्तव्यमिति। कस्यचिदेकार्थो निर्दिश्यते अन्यस्य तु संबन्धात्प्रतीतिर्भवतीति भावः। भवतीति। एकत्वादिषु गुणेषु स्त्वादयो विधीयन्ते गुणेभ्यश्च गुणिन आक्षेपो भवति निराधारस्य गुणस्यासंभवात्। तद्यथा शुक्ल इति। गुणमात्राभिधाने गुणिन आ

© Dharmartha Trust J&K. Digitized by eGangotri

विषमइति। यथा भ्रुकुंसः कुंसइति गुणो न गुणिमात्रस्याक्षेपो न गुणिविशेषस्य। एवं वृक्षः प्लक्ष इत्यत्राप्येकत्वाधारो द्रव्यमात्रं प्रतीयेत यदि लो

८ कादर्थावधारणं नाश्रीयेत तत्रापि शास्त्रेण प्रतिपदं प्रकृतिनिर्दिष्टे तावर्थः तथा रक्तादयो द्रव्यमात्राभिधायिनः स्युरिति प्रकरणाद्यभावे वि

शेषसंप्रत्ययो न स्यात् न भवति च। तस्माल्लोकव्यवहारादेव शब्दार्थसंबंधव्युत्पत्तिरभ्युपगन्तव्या पियुक्तिवशादेव ग्राह्येत्यर्थः। येषामर्थो न ज्ञायं

त इति। स्वर्गापूर्वदेवतादिशब्दानामर्थाः प्रत्यक्षापरिच्छेद्यत्वादिदं तया न ज्ञायंते तत्र तेषां कथमर्था निर्दिश्येरन्नित्यर्थः। अत्रैव विषय्यव्यवहार

विषमउपन्यासः। सामान्यशब्दा एत एवं स्युः सामान्यशब्दाश्च न अंतरेण प्रकरणं विशेषं वा विशेषेषु वर्तिष्यंते। यतस्त

खलु नियोगतो वृक्ष इत्युक्ते स्वभावतः कस्मिंश्चिदेव विशेषे वृक्षशब्दो वर्तते अतो मन्यामहे नेमे सामान्यशब्दा इति। न

चेत्सामान्यशब्दः प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययः प्रत्ययार्थे वर्तते। अप्रवृत्तिः खल्वर्थादेशनेन स्यात्। बहवो हि शब्दा येषा

मर्था न ज्ञायंते। जर्भरी तुर्फरीतू। अंतरेण खल्वपि शब्दप्रयोगं बहवोऽर्था गम्यंते। अक्षिनिकोचैः पाणिविहारैश्च। न खल्व

प्यनिर्दिष्टा तस्यार्थे स्यात् व्याख्याने किंचिदपि प्रयोजनमस्ति। यो हि ब्रूयात्पुरस्तादादित्य उदेतीति पश्चादस्तं गच्छतीति मधु

रो गुडः कटुकं शृंगबेरमिति किं तेन कृतं स्यात्। वा वचनानर्थक्यं स्वभावसिद्धत्वात्। वा वचनमनर्थकं। किं कारणं।

स्वभावसिद्धत्वात्। इह द्वौ पक्षौ वृत्तिपक्षश्चावृत्तिपक्षश्चेति। स्वभावतश्चैतद्भवति। वाक्यं च समासश्च। तत्र स्वाभाविके

तेषामर्थो विज्ञायत एव। अक्षिनिकोचैरिति। यथैते व्यवहारव वृत्तिविषये नित्यसमासे प्राप्ते वावचनेन किमन्यत्कर्तव्यं अभिसंबन्धुमनर्थ

शब्दार्थागम्यं तेन तथा प्रत्युक्ष्यते। नखल्वपीति। साध्वसाधुसंकरनिरासाय शास्त्रारंभात् अस्ति लोकव्यवहारावगतार्था व्याख्याने प्रयोजन

मित्यर्थः। वावचनानर्थक्यं स्यादिति। इह व्यपेक्षायां समासो न भवति। एकार्थीभावे वाक्यं नेति विविक्तविषयत्वादनयोर्वाध्यबाधकभावो न प्रवि

ष्यतीति नार्थो विकल्पेन। एकार्थानां विकल्पनात् न च संज्ञायामिति। एकार्थीभावे चित्रगुरित्येवेष्यते न तु चित्रा गावस्येति। तथा राजपुरुष इत्ये

ष्यते न राज्ञः पुरुष इति। एकपदमेकस्वरमेकविभक्तिकत्वं च सर्वदैकार्थीभाव इष्यत इत्यर्थः॥

शिवः ८

© Dharmartha Trust J&K. Digitized by eGangotri

अथेति। कार्यशब्दिकाश्चाकारेण विकल्पेन वृत्तिं निष्पाद्यां मन्यमानाः किं वृत्तेर्लक्षणं कुर्वन्तीति प्रश्नः। नैयायिकास्तु वृत्तिवाक्ये नित्ये विविक्तविषये मन्यन्ते। परार्थाभिधानमिति। परस्य शब्दस्य योऽर्थस्तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिरित्यर्थः। यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायामनुक्तः पुरुषार्थोऽभिधीयते। अथ तेषामिति। नित्यशब्दवादिपक्षे राजपुरुषादीनि वाक्यविषयपदसरूपावयवानि वर्णवदनर्थकोपलभ्यमानावयवानि तत्त्वतो निरवयवानि केवलमसत्यप्रक्रियाश्रयेणान्वाख्यायन्ते। जहतीति पदानि स्वार्थं यस्यां सा जहत्स्वार्था। पुरुषमात्रस्येति। राजपदोपादानमनर्थकमिति चेत्पर्यायत्वं पुरुष

अथ ये वृत्तिं वर्तयन्ति किं त आहुः। परार्थाभिधानं वृत्तिमाहुः। अथ तेषामेवं ब्रुवतां किं जहत्स्वार्था वृत्तिराहोस्विदजहत्स्वार्था भवति। किं चातः। यदि जहत्स्वार्था वृत्तिः राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति औपगवमानयेत्युक्तेऽपत्यमात्रस्येति। अथाजहत्स्वार्था वृत्तिः उभयोर्विद्यमानत्वात्स्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। का पुनर्वृत्तिर्न्याय्या। जहत्स्वार्था। युक्तं पुनर्यज्जहत्स्वार्था नाम वृत्तिः स्यात्। बाढं युक्तम्। एवं हि दृश्यते लोके। पुरुषोऽयं परकर्मणि प्रवर्तमानः स्वं कर्म जहाति। तद्यथा। तक्षा राजकर्मणि प्रवर्तमानः स्वं कर्म जहाति। एवं युक्तं यद्राजा पुरुषार्थे वर्तमानः स्वमर्थं जह्यादुपगुश्चापत्यार्थे वर्तमानः स्वमर्थं जह्यात्। ननु चोक्तं राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति औपगवमानयेत्युक्ते पुरुषमात्रस्येति। नैष दोषः। जहदप्यसौ स्वार्थं नात्यन्ताय जहाति। यः परार्थविरोधी स्वार्थस्तं जहाति॥

राजपुरुषशब्दयोर्यावद्वाक्यवत्स्यादित्यदोषः। द्विवचनं प्राप्नोतीति। लक्षण्ययोर्धावितिर्यथा। जहत्स्वार्थेति। नहि स्वार्थमजहत्स्तेनार्थेन वशीकृतस्यार्थान्तरोपादानं घटते। युक्तं पुनरिति। उपात्तस्यार्थस्य त्यागाभावात्प्रश्नेनैवोत्सृष्टस्य। बाढं युक्तमिति। परार्थवृत्तित्वादेव। अत्रैव दृष्टान्तमाह। तक्षा राजकर्मणीति। यदा राज्ञा तक्षा भृत्यादौ नियुज्यते तदा स्वकं कर्म जहातीति। नात्यन्तायेति। त्यागमात्रमभिसंधाय जहत्स्वार्थेत्युच्यते न तु सर्वात्मना त्यागः। परोपकाराय तस्योपादानात्। सर्वथा च स्वार्थत्यागे परोपकारासंपादनमेव प्रयोजनाभावात्तस्य स्यादित्यर्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰कै॰

९ हि किञ्चिदिति। तेषां प्राणिधर्मत्वात्त्यागे तस्य राजकर्मैव विच्छिद्येतेत्यर्थः। न चायमर्थ इति। वाक्येऽपि राजार्थस्याविशेषणत्वात्। कस्तस्य वृत्तौ विशेष इति चेत्।
वाक्ये स्वविशेषणाप्रतिपत्तौ सामर्थ्याविघातः। वृत्तावुपसर्जनीभूतेन स्वार्थेन प्रधानार्थस्योपकारात्तद्विशेषणाप्रतिपत्तौ सामर्थ्यहानिः। अन्वया
दिति। राजशब्दः स्वार्थनिमित्तं पुरुषार्थे विशेषमाधाय स्वार्थं जहाति। न च तन्निमित्तविशेषदर्शनं निवर्त्तते पुरुषे। यथाग्निसंबंधजनितपाकजरू
पादिनिवृत्तिर्घटेऽग्निसंयोगे निवृत्तेऽपि न भवतीत्यर्थः। विशेषणमिति। विशेषः पुरुषगतो भविष्यतीत्यर्थः। मल्लिकापुट इति। आमोदाद्विशेषाव

तद्यथा। तक्षा राजकर्मणि प्रवर्त्तमानः स्वं तक्षकर्म जहाति। न हि किञ्चित् हसितकण्डूयितानि। न चायमर्थः परार्थविरोधी विशेष
णं नाम। तस्मात्तन्न हास्यति। अथवा ऽन्वयाद्विशेषणं भवति। तद्यथा घृतघटस्तैलघट इति। निषिक्ते घृते तैले चान्वयाद्वि
शेषणं भवति अयं घृतघटो ऽयं तैलघट इति। विषम उपन्यासः। भवति हि तत्र यस्त्वयावता चार्थमात्रा। अंग हि भवान
ग्नौ निष्टप्य घृतघटं कूर्चेन प्रक्षालयतु न गंस्यते स विशेषः। यथा तर्हि मल्लिकापुटश्चंपकपुट इति। निःकीर्णास्वपि सु
हण५ मनःसु अन्वयाद्विशेषणं भवति। अयं मल्लिकापुटः अयं चंपकपुट इति। अथ वा समर्थाधिकारोऽयं वृत्तौ क्रियते। सा
मर्थ्यं नाम भेदः संसर्गो वा। अपर आह। भेदसंसर्गौ वा सामर्थ्यमिति। कः पुनर्भेदः संसर्गो वा। इह राज्ञ इत्युक्ते सर्वं स्वं प्रस
क्तं पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। इहेदानीमुभयस्मिन्नुच्यमाने राजा पुरुषं निवर्त्तयत्यन्येभ्यः स्वामिभ्यः पुरुषो राजा
नमन्येभ्यः स्वेभ्यः। एवमेतस्मिन्नुभयतो व्यवच्छिन्ने यदि जहाति

गतिरिति भावः। वृत्तौ क्रियत इति। यदि च वृत्तौ भेदसंसर्गौ न स्यातां तदा सामर्थ्यमेव न
स्यात्तदात्मकत्वात्सामर्थ्यस्येत्यर्थः। तत्र भेदः संसर्गाविनाभावित्वादनुमीयमानसंसर्गः सामर्थ्यं संसर्गो वा भेदाविनाभावनुमेयभेदः। तु भो वा योगपद्येनाश्री
यमाणो सामर्थ्यमित्यर्थः। सर्वं स्वमिति। राज्ञ इति षष्ठ्याः संबंधिमात्रस्याक्षेपात्। सर्वः स्वामीति। यदा पुरुषस्य पारतंत्र्यं प्रमाणान्तरेण प्रतिपन्नं तदपेक्षयेतदुच्य शिवः
ते। अन्यथा पुरुष इत्युक्ते स्वातंत्र्यप्रतीतिः स्यात् न तु स्वामिमात्राक्षेपः। तत्र भेदपक्षे राजा पुरुषं स्वाम्यन्तरेभ्यो निवर्त्य स्वार्थं जहाति। पुरुषस्तु राजरूपि स्वार्थं स्वान्तरेभ्यो राजानं ९
निवर्त्तयतीति। तत्स्वरूपकार्यस्याभावात् राजार्थस्य निवृत्तिः। अकृतकार्यस्य निवृत्तौ वृत्तिरेव न स्यात्। एवं संसर्गेऽपि योज्यं। उभय
त इति। उभयस्मिन्नरे

© Dharmartha Trust J&K. Digitized by eGangotri

युक्तं पुनरिति। स्वमर्थमजहत्तस्येनावशीकृतस्यार्थान्तरोपादानमयुक्तमिति भावः। संचयायेति। एवं प्राक्ष्येपि क्वचिद्विषये एकार्थः क्वचिदनेकार्थ इत्यर्थः। कस्मादिति। एकया
विभक्त्या गुणप्रधानभूतस्यार्थद्वयस्य प्रतिपादयितुमशक्यत्वादिति प्रश्नः। प्रथमाया इति। प्रधानानुविधायित्वाद्गुणानां प्रधानाद्विभक्तिः प्रथमा गुणेनापि प्रतिपत्तव्येति
भावः। न प्रथमा समर्थ इति। प्रथमाद्विवचनमुत्पाद्यमानं संबंधासंप्रसयागुणप्रधानभाव एव न प्रतीयेत। षष्ठ्यास्तर्हीति। संबंधस्य प्रसाध्यत्वात्तस्य चोभयाभिष्ठानत्वा
त्। न षष्ठीति। यदि षष्ठी द्विवचनं स्यात्तदा द्वयोरपि समकक्षत्वेन संबंधं तरापेक्षायां संबंधः प्रतीयेत। अभिहित इति। कश्चिदर्थोभिहितोपि नान्तर्भूतः। यथा राजेति षष्ठ्या

अथवा पुनरस्त्वजहत्स्वार्था वृत्तिः। युक्तं पुनरिदं यदजहत्स्वार्था नाम वृत्तिः स्यात्। बाढं युक्तम्। एवं हि दृश्यते लोके। भिक्षुकोयं द्वि
तीयां भिक्षां समासाद्य पूर्वां न जहाति। संचयायैव प्रवर्त्तते। ननु चोक्तमुभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवच
नं प्राप्नोति। कस्मात्पुनर्द्विवचनं प्राप्नोति। प्रथमायाः। न प्रथमासमर्था राज्ञा। षष्ठ्यास्तर्हि प्राप्नोति। न षष्ठी समर्था पुरुषः। प्र
थमाया एव तर्हि प्राप्नोति। ननु चोक्तं न प्रथमासमर्था राज्ञेति। अभिहितः सोर्थोन्तर्भूतः प्रातिपदिकार्थः संपन्नस्तत्र प्राति
पदिकार्थे प्रथमेति प्रथमाया एव द्विवचनं प्राप्नोति। संघातस्यैकार्थ्यान्नावयवसंख्यातः सुबुत्पत्तिः। संघातस्यैक
त्वमर्थः तेनावयवसंख्यातः सुबुत्पत्तिर्न भवति। परस्परव्यपेक्षां सामर्थ्यमेके। परस्परव्यपेक्षां सामर्थ्यमेके इ
ति। का पुनः शब्दयोर्व्यपेक्षा। न ब्रूमः शब्दयोरिति। किं तर्ह्यर्थयोः॥

भिहितो न कुत्रचिदन्तर्भूतः। क्वचिदन्तर्भूतोपि नाभिहितः। यथा राजसखइ
ति तत्पुरुषे राज्ञा सख्यस्य संबन्धोन्तर्भवति न त्वभिधीयते। तथा कश्चिदर्थो ~~नाभिहितोन्तर्भूतो न च सोऽप्रातिपदिकार्थ इति त्रयमप्युपात्तं। तत्र संबंधोन्तर्भूतः~~ अभिहितो
न्तर्भूतः। यथा पचतीति कर्त्ताभिधीयमानो गुणभावादन्तर्भूतः न तु सोऽप्रातिपदिकार्थ इति त्रयमप्युपात्तं। तत्र संबंधोभिहितोन्तर्भूतः प्रातिपदिकार्थः संपन्न इति। व्यति
रेकाभावात्प्रथमाद्विवचनं प्राप्नोति। संघातस्येति। इह राजपुरुषात्संघाताद्विभक्त्योत्पत्तव्यं। तेन संघातेनावयवार्थोपकृत एकत्वसंख्यायुक्तो विशिष्टोर्थः प्रति
पाद्यत इति तदाश्रयमेकवचनं प्रवर्तते न तु गुणभूतावयवसंख्याश्रयं द्विवचनमिति। सामर्थ्यः परस्परेति। व्यपेक्षैवात्र सामर्थ्यं न त्वेकार्थीभाव इत्याकूतः। का पुन
रिति। स्वं स्वमर्थं प्रति गुणभावाच्छब्दयोः परस्परव्यपेक्षा न संभवतीति प्रश्नः। अर्थयोरिति। प्रमाणगताया

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰ के॰

ममायमिति। स्नानादिक्रियानिमित्तं राज्ञः स्वाम्यमुपजायते। अहमस्येति पुरुषस्य प्रतिपत्त्यादिनिमित्तं स्वत्वोत्पादः। क्रियाकारकयोरिति। कारकशब्देनात्र शक्त्याधारो द्रव्य

१० मुच्यते। क्रियाद्रव्ययोरभिसंबंधनिमित्तत्वाच्छक्तेरेवाभिसंबंधः। तेन कर्मशक्तेर्वाचिका द्वितीयेवेत्यर्थः। अथवा कारकशब्देन शक्तिरेवोच्यते। शक्तेश्च वाचिका द्वि

तीया सामर्थ्यात् क्रियाकारकसंबंधस्यावगमात्तस्य वाचिकेत्युक्तं। अर्थयर्थेवेति। यद्यस्मात्तत्त्वाद्विविधस्यापि सामर्थ्यस्य संभवः प्रत्ययः तदप्युक्तायुक्तवि

10

इह राज्ञः पुरुष इत्युक्ते राजा पुरुषमपेक्षते ममायमिति पुरुषो राजानमपेक्षते अहमस्येति। तयोरभिसंबंधस्य षष्ठी वाचिका भवति। तथा कष्टं श्रित इति क्रियाकारकयोरभिसंबंधस्य द्वितीया वाचिका भवति। अथ येषां वैकार्थीभावः सामर्थ्यमथापि व्यपेक्षा सामर्थ्यं किं गतमेतदियता सूत्रेण आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यं। गतमित्याह। कथं। समोयमर्थशब्देन समासः समश्चोपसर्गः। उपसर्गाः पुनरेवमात्मकाः यत्र कश्चित्क्रियावाची शब्दः प्रयुज्यते तत्र क्रियाविशेषमाहुः। न चेह कश्चित्क्रियावाची शब्दः प्रयुज्यते। येन समः सामर्थ्यं स्यात्। तत्र प्रयोगादेतज्ज्ञातव्यं नूनमत्र प्रयोगार्हः शब्दः न प्रयुज्यते येन समः सामर्थ्यमिति। तद्यथा धूमं दृष्ट्वाग्निरत्रेति गम्यते त्रिविष्टब्धकं दृष्ट्वा परिव्राजक इति। कः पुनरसौ प्रयोगार्हः शब्दः। उच्यते। संगतार्थः समर्थः संसृ

४ एकार्थीभावः ष्टार्थः समर्थः संप्रेक्षितार्थः समर्थः संबद्धार्थः समर्थ इति। तद्यदा सामर्थ्यं तदैवं विग्रहः करिष्यते। संगतार्थः संसृष्टार्थः समर्थ इति। तद्यथा संगतं घृतं तैलेनेत्युच्यते। एकीभूतमिति गम्यते। संसृष्टार्थः समर्थ इति। तद्यथा। संसृष्टोग्निरित्युच्यते। एकीभूत इति गम्यते। तद्यदा व्यपेक्षा सामर्थ्यं तदैवं विग्रहः करिष्यते। संप्रेक्षितार्थः समर्थः संबद्धार्थः समर्थ इति। कः पुनरिह संबद्धार्थः संबद्ध इत्युच्यते यो रज्ज्वा अयसा कीलेन वा प्रतिषक्तो भवति। नावश्यं बध्नातिर्यतिषङ्ग एव वर्तते। किं तर्हि हानावपि वर्तते। तद्यथा। संब शिवः

द्धविभौ दम्यावित्युच्यते यावन्योन्यं न जहीतः। अथवा भवति चैवंजातीयकेषु बध्नातिर्व

चारणायुक्तानामपेक्षे[?]तिप्रश्नः। संचोपसर्ग इति। तेन नतस्य

ऽव्यवाचकासामर्थ्यं नोपपद्यत इति संशब्दो पादानाद्योग्या क्रियाक्षिप्यत इत्यर्थः। संगतार्थं संसृष्टार्थमितितुल्यार्थधातुनिर्देशः। संप्रेक्षितार्थं संबद्धार्थमिति पर्याय १०

निर्देशः। प्रतिषंग इति रज्ज्वादिनिमित्तः संश्लेषो वा प्रतिषंगः। एवंजातीयकेष्विति। व्यपेक्षायुक्तेष्वित्यर्थः। भक्तिन इति। सलामपिहामौ विद्यादिकृतापेक्षायां संबंधशब्दस्य

दर्शनादित्यर्थः॥ भाः॥

© Dharmartha Trust J&K. Digitized by eGangotri

अथैतस्मिन्निति। यद्यपि सत्त्वे कार्यी भावो नाभ्युपगम्यते तत्सा वाक्यत्वसंख्याविशेषोपसर्जनविशेषणादीनां प्रसंगात्तदभावो वचनेन प्रतिपा[redacted]द्यः वा वाच्चनं वचनकर्त
व्यं समानवाक्यस्यानिरस्यर्थं। तदेवं शब्दस्य सत्त्वाभाविकं रूपं कदाचिन्निसदर्शनेनानुगम्यते। कदाचिद्बुधबोधनार्थं कार्यदर्शनाश्रयेण। कार्यपक्षे तु बहवो वार्त्ता
धर्मा वचनेन प्रतिपाद्या इति गौरवप्रसंगः। तथाहि। निष्कौशांबिः गोरथः घृतघटः गुडधानाः केशचूडः सुवर्णालंकारः द्विदशाः सप्तपर्णः गोरस्वेद इत्यादि
षु क्रांतयुक्तपूर्णमिश्रसमाहारविकारसंघात्यलोपो वा क्तान्तेति विशेषाभिधायित्वं वचनप्रतिपाद्यं। नित्यदर्शने त्वेकार्थीभावकृत एवायं विशेष इति न किं
चित्प्रतिपादनीयं। एवं व्यपेक्षासामर्थ्ये दोषमभिधाय इदानीं ये सव्यपेक्षादोषास्ताननुदाहरति। तत्र नानाकारकादिति। नानाशब्दः पृथग्भाववचनस्तेन भिन्नायाः

अथैतस्मिन्व्यपेक्षायां सामर्थ्ये योसावेकार्थीभावकृतो विशेषः स वक्तव्यः। तत्र नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषे
धः। तत्रैतस्मिन्व्यपेक्षायां सामर्थ्ये योसावेकार्थीभावकृतो विशेषः सति नानाकारकान्निघातयुष्मदस्मदादेशाः प्राप्नुवंति तेषां प्र
तिषेधो वक्तव्यः। निघात। अस्ति दंडो हरानेन। अस्ति दंडस्य हरतेश्च व्यपेक्षेति कृत्वा निघातः प्राप्नोति। युष्मदस्मदादेशः पचौदनं त
व भविष्यति मम भविष्यतीति। अस्त्योदनस्य युष्मदस्मदोश्च व्यपेक्षेति कृत्वा वान्नावादयः प्राप्नुवंति तेषां प्रतिषेधो वक्तव्यः। किमु
च्यते नानाकारकादिति। यदा तेनैवासन्न्यस्क्रियते। नापि क्रूपः अन्येनासन्न्यस्क्रियत इति। किं तर्हि शब्दप्रमाणका वयं यच्छब्द आह त
दस्माकं प्रमाणं। शब्दश्चेह सत्तानां हृय अयं दंडः अस्तीति गम्यते स दंडः कर्त्ता भवत्वा न्येन शब्देनाभिसंबध्यमानः करणं संपद्य

क्रियायाः यत्कारकं तन्नानाकारकं यथायं दंडो हरानेनेति दंडो स्ति क्रियायाः कर्तृ न ॥ ते। तत्र यथा। कश्चित्कंचित्पृच्छति कस्येव दंत इति। मेतस्यायं [illegible]
तु हरतिक्रियायाः। तथा नानाभिन्नमन्यत्कारकं यस्य[redacted]तदपि नानाकारकं। यथौदनं पच तव भविष्यतीति अत्र पचेस्तवेत्येतत्कारकत्वेन नोपात्तं ततः पचेस्तेन
साकृत्तरस्य युष्मदादेशो न भवति। क्वचित्तु पचौदनं तव भविष्यतीति पाठः। ओदनस्य पचति क्रियां प्रति कारकत्वं न तु भवति क्रियां प्रतीति नानाकारकत्वं
भिन्नक्रियापेक्षात्कारकत्वस्य। अस्ति दंडस्येति। अनेनेति पदेन दंडस्य हरणकरणत्वेन निर्देशात्। अस्त्योदनस्येति। स्वस्वामिभावस्य भाविनः प्रतिपादनादि
त्यर्थः। तेनैवासन्न्यस्येति। ततश्च दंडस्य हरणं प्रतिकारकत्वान्नास्ति नानाकारकत्वमिति प्रश्नः। अयं दंडोस्तीति यत्रान्यक्रियापरत्वं न श्रूयते तत्रांतरंगत्वादस्ति
क्रियैव प्रतीयते। न तो स्ति क्रियायां दंडस्य कर्तृत्वाद्भवत्येव नानाकारकत्वमित्यर्थः। क्वचिदेव

© Dharmartha Trust J&K. Digitized by eGangotri

यस्मिंस्तिष्ठतीति। यदा त्वेनिपातितात्वक्षाएकस्तूर्ध्वस्तदा विशिष्टस्याधिकरणत्वेन देवदत्तः प्रतिपाद्यते। प्रचयइति। अनेकस्मिन्संबन्धिनि विवक्षिते इत्यर्थः। तत्र गोराज्ञापि
सामर्थ्यमश्वपुरुषाभ्यामपि। तत्र युगपद्द्वन्द्वतत्पुरुषौ प्राप्नुतः। पूर्वं वा [illegible]न्तत्पुरुषः पश्चाद्द्वन्द्वः। विप्रतिषेधाभावाच्च परत्वेन वा वस्याभिन्नसमुदायविष
यत्वात्संज्ञाद्वयस्य। तत्र षष्ठीतत्पुरुषे सति गोरतद्धितलुकीति टच्प्राप्नोति। अर्थश्च भिद्यते राजगवाश्वपुरुषा इत्युच्यमानेऽश्वपुरुषयोर्या राज्ञा संबंधो न प्रती
यते। समर्थतराणां वेति। शक्ततराणामित्यर्थः। एषां ह्याश्रुतरेति। प्रथमप्रातिपदिकार्थमात्रे विधीयमानानां किंचिद्द्वासंवस्त्वपेक्षते। षष्ठी तु बाह्यसंबंधापेक्षता

॥ यस्मिंस्तिष्ठतीति। स वृक्षोऽधिकरणं भूत्वान्येन शब्देनाभिसंबध्यमानः कर्त्ता संपद्यते। प्रचये समासप्रतिषेधः। प्रचये समास
प्रतिषेधो वक्तव्यः। राज्ञो गौश्चाश्वश्च पुरुषश्चेति। राजगवाश्वपुरुषा इति। समर्थतराणां वा समुदायसामर्थ्यात्। समर्थतराणां
वा पदानां समासो भविष्यति। कानि पुनः समर्थतराणि। यानि द्वंद्वभावीनि। कुत एतत्। एषां ह्याश्रुतरः शब्दैः प्राप्नोति। तद्यथा।
समर्थतरोऽयं माणवकोऽध्ययनायेत्युच्यते। आश्रुतरग्रंथ इति [illegible]ति गम्यते। अपर आह। समर्थतराणां वा समुदायसाम
र्थ्यात् समर्थतराणां वा पदानां समासो भविष्यति। कानि पुनः समर्थतराणि। यानि द्वन्द्वभावीनि। कुत एतत्। एतानि हि समान
वृत्तीनि। अन्यथाविभक्ती राजा भवति चाविशेषः स्वस्मिन्भ्रातरि पितर्यपुत्रे च। समुदायसामर्थ्याद्वा सिद्धं। समुदायसाम
र्थ्याद्वा पुनः सिद्धमेतत्। समुदाये नराज्ञः सामर्थ्यं भवति नावयवेन। अपर आह। समर्थतराणां वा समुदायसामर्थ्यात्। स
मर्थतराणां वा पदानां समासो भविष्यति। कुत एतत्। समुदायसामर्थ्यात्।

बहिरंगा। तत्रांतरंगः प्रथमान्निमित्तः पूर्वं द्वन्द्वो भवति प्रसिद्धं बहिरं
गमंतरंगा इति द्वंद्वे कर्त्तव्ये षष्ठीसमासस्यासिद्धत्वात्। आश्रुतरे ग्रन्थ इति। आशुप्रतिपन्नयोर्ग्रंथ आश्रुतर उच्यते। एतानीति। तु सजातीयत्वव्यपेक्षायां शिवः
एकार्थीभावे च प्रत्यासन्नतरं कारणमित्यर्थः। समुदायसामर्थ्यादिति। समुदायद्वन्द्वार्थं प्रति राज्ञो विशेषणत्वेनोपात्त इति तेनैव राज्ञः सामर्थ्यं नावयवे
नेत्यर्थः। अपर आहेति। अत्र पक्षे समुदायसामर्थ्यं समर्थतरत्वे हेतुः समुदायसंबंधे चावयवस्याप्यनुमीयमानः संबंधोऽस्तीति तदपेक्षः प्रकर्षप्रत्ययः॥

© Dharmartha Trust J&K. Digitized by eGangotri

अस्मिन्पक्ष इति। एकस्मिन्नाख्याते तु द्वयोपादाने विकल्पो भवति। इह तु न्यायानो हेतुः। एतच्चेति। सापेक्षत्वेनासामर्थ्यात् प्रयोगवासरु समासो न भवतीत्यस्यार्थस्य वा शब्दः
प्रतिपादकः। आख्यातमिति। नानाकारकान्निघातादिनिवृत्तये क विभक्तये च समानवाक्ये निघातयुष्मदस्मदादेशा वक्ष्यंते। तत्र लौकिकवाक्यग्रहणं निषेधार्थं वा
कंपरिभाष्यते। अव्ययकारकविशेषणानि प्रत्येकं समुदितानि वा॥ आयंते। यथा वृषलेन प्रवेष्टव्यमिति। अहं कुर्वाङ्गम्यवायेपीति च। आख्यातमिति चैकत्वं विवक्ष्य
ते। लक्षणविधानसामर्थ्यात्। तथा च तिङ्तिङ इत्यत्र च वक्ष्यते। तिङ्प्रतिषेधानर्थक्यं समानवाक्याधिकारादिति। भवति पचतीत्यादौ सत्यपि साध्यसाधनभावे आख्या

अस्मिन्पक्षे चेत्येतदसामर्थितं भवति। एतच्च समर्थितं। कथं। नैव वारणं योगवाश्वपुरुषाव पेक्ष्य माणस्य गवा सह समासो भवति।
कथं तर्हि गोराज्ञ नमपेक्षमाणस्याश्वपुरुषाभ्यां समासो भवति। तदप्रधानमत्र गौर्भवति। भवति च प्रधानस्य सापेक्षस्यापि स
मासः। आख्यातं साव्ययकारकविशेषणं वाक्यं। आख्यातं साव्ययं सकारकं सकारकविशेषणं च वाक्यसंज्ञं भवतीति वक्तव्यं। साव्य
यं। उच्चैः पठति नीचैः पठति। सकारकं। ओदनं पचति। सकारकविशेषणं। मृदु विशदमोदनं पचति। सक्रियाविशेषणं चेति व
क्तव्यं। सुष्ठु पचति दुष्ठु पचति। अपर आह। सविशेषणमित्येव। सर्वाणि ह्येतानि क्रियाविशेषणानि। एकतिङ्। एकतिङ् वाक्यं
भवतीति वक्तव्यं। ब्रूहि ब्रूहि देवदत्त। समानवाक्ये निघातयुष्मदस्मदादेशाः। समानवाक्ये इति प्रकृत्य निघातयुष्मदस्मदादे
शाः वक्तव्याः। किं प्रयोजनं। नानावाक्ये मा भूवन्निघातादय इति। अयं दण्डो हरानेन। ओदनं पच तव भविष्यति मम भविष्य
ति। योगप्रतिषेधश्चादिभिः। चादिभिर्योगे प्रतिषेधो वक्तव्यः। ग्रामस्तव च स्वं मम च स्वं। किमर्थमिदमुच्यते। यथान्यासे एन

तयोर्द्वित्वात्समानवाक्यत्वाभावान्निघाताप्रसंगात्। उच्चैरिति। यद्यप्यव्ययं कारकं च विशेष चादिभिर्योगे प्रतिषेध उच्यते। इदमयाः पूर्वं क्रियते वाक्यसं
णं तथापि प्रपंचार्थमस्योपादानं। तथा च वक्ष्यते आख्यातं सविशेषणमित्येवेति। सक्रियाविशेषणं चेति। प्रत्यासत्त्या कारकस्यैव यद्विशेषणं तद्ग्रहणेन तु क्रियायाः
इति भावः। आख्यातेन क्रियाप्रधानत्वं लक्ष्यते इत्यतिङंतेष्वपि देवदत्तेन गन्तव्यमित्यादिषु वाक्यत्वं सिध्यति। एकतिङिति। एकशब्दः समानवचनो न बहुव्री
हि वाची। ब्रूहि ब्रूहीति। ब्रूहि ब्रूहि देवदत्तेत्यत्र वाक्यत्वादामंत्रितनिघातः सिध्यति॥

© Dharmartha Trust J&K. Digitized by eGangotri

समर्थनिघातेहीति। निघातउपलक्षणं। तेनयुष्मदस्मदादेशाग्रहणं। पटवेतइति। अत्रसमानाधिकरणं असमर्थंभवतीतिवाचनिकमसामर्थ्यमिति। असतिसमा
नवाक्याधिकारेयुष्मदस्मदादेशेन स्यात्। युक्तयुक्तेपिसापेक्षत्वाभावात्कार्यं नस्यात्। नयाद्युत्पादिकारकविशेषणं विज्ञेयं। राजगवीक्षीरइति। राज्ञोयागो
स्तस्याःक्षीरमित्येतस्मिन्नर्थे राजगोक्षीरमित्यपिप्राप्नोति। किमुच्यतइति। द्वयोःषष्ठ्यंतयोःसमासप्रसंगइत्यर्थमतापर्यनुयुंक्ते। रूपरूपेपि। संख्यायाविवक्षि

तद्वित्वंविज्ञानीयात्सर्वमेतद्विकल्पतइति। तदाचार्यःसुहृद्भूत्वान्वाचष्टेवादिभिर्योगैर्यथान्यासमेवभवतीति। साचावश्यंवाक्यसंज्ञा
वक्तव्यासमानवाक्याधिकारश्चवक्तव्यः। समर्थनिघातेहि समानाधिकरणयुक्तयुक्तेषूपसंख्यानमसमर्थत्वात्। समर्थनिघा
तेसमानाधिकरणयुक्तयुक्तेषूपसंख्यानंकर्त्तव्यंस्यात्। समानाधिकरणयथा। पटवतेदास्यामि। समानाधिकरण। युक्तयु
क्तयुक्ते। नद्यास्तिष्ठतिकूलेस्वस्यलंबतेशाखा। शालीनांतओदनंददातिशालीनांमओदनंददातीति। किंपुनःकारणंनसिध्यति।
असमर्थत्वात्। राजगवीक्षीरेद्विसमासप्रसंगोद्विषष्ठीभावात्। राजगवीक्षीरेद्विसमासप्रसंगोपि। किंकारणं। द्विषष्ठीभावा
त्। द्वेह्यत्रषष्ठ्यौ। राज्ञोगोःक्षीरमिति। किमुच्यतेद्विसमासप्रसंगइति। यदातुसुब्सुपेतिवर्त्ततेतदाद्विसमासप्रसंगइति। ने
वंविज्ञायतेद्वयोःसमासः सप्रसंगोद्विसमासप्रसंगइति। कथंतर्हिद्विप्रकारकस्यसमासस्यप्रसंगोद्विसमा
सप्रसंगइति। राजगोक्षीरमित्यपिप्राप्नोति। नचैवंभवितव्यं। भवितव्यंचयदेतद्वाक्यंभवतिगोःक्षीरंगोक्षीरं राज्ञोगोक्षी
रंराजगोक्षीरमिति। यदात्वेतद्वाक्यंभवति। राज्ञोगोक्षीरमितितदानभवितव्यं। तदाचप्राप्नोति। तदाकस्मान्नभवति॥

तत्वात्समुदायस्यचास्वंतत्वात्नास्तिप्रसंगइत्यर्थः। इतरोभिप्रायंप्रकाशयति। नैवमिति। द्वयोःसमासयोःसमाहारोद्विसमासं। पात्रादिभ्यःप्रतिषेधइतिस्त्रीत्वाभावः। अक्रमे शिवः
वार्थशब्दान्तरेणाभ्यक्तीकरोति। द्विप्रकारकेस्यति। एकस्मिन्नेवार्थेकदाचिद्राजगवीक्षीरंकदाचिद्राजगोक्षीरमित्यपिप्राप्नोतीत्यर्थः। भ॰ वितव्यंचेति। अर्थांतरइत्यर्थः। त
दाचगवावच्छिन्नंक्षीरंराजस्वामिकमितिप्रतीयते। गोस्तुराजविशिष्टत्वमप्रतीयते॥ १२

© Dharmartha Trust J&K. Digitized by eGangotri

राजविशिष्टाया इति। ततश्च पूर्वं राज्ञा गोः संबंधः पश्चात्क्षीरेण संबन्धः। नैव वेति। सत्यपि गोरुभाभ्यां संबंधे सापेक्षमसमर्थं भवतीत्यसामर्थ्याद्गोः क्षीरेण समासो न भवति। राज्ञा तु भवति। राज्ञापेक्षया गोः प्राधान्यात्। एतदुक्तं भवति। महत्कष्टमित्यादिवत्सूत्रे वा स्वार्थस्य द्विवारितत्वात्पुनश्चोदनीयं राजगवीक्षीरे द्विःसमासप्रसंग इति। समर्थाधिकार इति। परार्थ्यसामान्यात्परिभाषाधिकारशब्देनोक्तः। विनियोगो ह्यधिकारः स च परिभाषायामप्यस्ति। तथा च कुत्वोः कृत्पोर्वे। सत्र वक्ष्यते अधिकारे

सिद्धं तु राजविशिष्टाया गोः क्षीरेण सामर्थ्यात्। सिद्धमेतत्। कथं। राजविशिष्टाया गोः क्षीरेण सह समासो भवति। न केवलायाः। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। यथैवायं गवि यत्नेन क्षीरमात्रे संप्रत्ययं करोति। एवं राजन्यपि यत्नेन एकोऽयं गोस्तस्याः क्षीरमिति। नैव वा पुनरत्र गो राज्ञानमपेक्षमाणाया: क्षीरेण सह समासः प्राप्नोति। किं कारणं। असामर्थ्यात्। कथमसामर्थ्यं। सापेक्षमसमर्थं भवतीति। कथं तर्हि गोः क्षीरमपेक्षमाणाया: राज्ञा सह समासो भवति। प्रधानमत्र तदा गोर्भवति। भवति च प्रधानस्य सापेक्षस्यापि समासः। अथ किमर्थं पदविधौ समर्थाधिकारः क्रियते। पदविधौ समर्थवचनं वर्णाश्रये शास्त्र आनंतर्यविज्ञानार्थं ज्ञानात्। पदविधौ समर्थाधिकारः क्रियते। वर्णाश्रये शास्त्र आनंतर्यस्य [illegible] मात्रे यथा कार्यं विज्ञायेतेति। तिष्ठतु दध्यशान त्वं शाकेन। तिष्ठतु कुमारीच्छत्रं हर देवदत्तेति॥ ॥

नामात्र प्रकार इति। अत्र पदग्रहणस्याक्षेपः। समर्थो विधिरित्येव वक्तव्यं। आनंतर्यमात्रमिति। विनापि सामर्थ्येनेत्यर्थः। तिष्ठतु कुमारीच्छत्रमिति। दीर्घादिति नित्यस्तुग्भवति। पदान्ताद्वेति। एकविकल्पितः स पदविधित्वात्सामर्थ्ये न भवति साधुः। अन्ये तु पदान्ताद्वेत्यनेन दीर्घात्पदे विशेष्यमाणे लभ्यते इदं तत्त्वं तत्र गुणसामर्थ्यात्पदान्तको विप्रकर्षो विज्ञायते। पदान्तस्य दीर्घस्य तुग्भवति न तु दीर्घान्तस्य पदस्येति पदविधित्वाभावादसत्यपि सामर्थ्ये वा तुग्भवति साधुः॥ ॥

भा॰ के॰

समर्थाधिकारस्येति। विधिशब्दश्चेह कर्मसाधन एवोपात्तः। तस्य पदसंबंधी समासादिः। तथाहि। समर्थानां यः समासः स समर्थ एव। योप्यसमर्थानां भार्या राज्ञः

१३ पुरुषो देवदत्तस्येत्यादौ सोपि नियमाभावान्निर्वृत्त एव। ४ एकार्थीभावाच्च तत्सामानाधिकरण्यं च समर्थ इत्युपात्तं। तत्रासमर्थानां पदानां सामर्थ्यस्यानिवर्तितत्वात्समर्थव

चनेन न किंचित्कृतमित्यर्थः। ४ तस्याप्यसमर्थसमासस्यापनेन समर्थवचनेन निर्वृत्तत्वात् किं चिक्रिय ते लक्षणांतरेणानिष्पन्नत्वात्। लक्षणांतरेण साधुत्वस्य

समर्थाधिकारस्य विधेयसामानाधिकरण्यान्निर्देशानर्थक्यं। समर्थाधिकारोयं विधेयेन समानाधिकरणः। किं च विधे

13 यः। समासः। यावद्ब्रूयात् समर्थः समर्थः समास इति तावत्समर्थः पदविधिरिति। न च राज्ञः पुरुष इत्येतस्मिन् समवस्थायां समर्था

धिकारेण किंचिदपि शक्यं प्रवर्तयितुं वा निवर्तयितुं वा। समर्थाधिकारस्य विधेयेन सामानाधिकरण्यान्निर्देशोऽन

र्थकः। सिद्धं तु समर्थानामिति वचनात्। सिद्धमेतत्। कथं। समर्थानां पदानां पदानां विधिर्भवतीति वक्तव्यं। एवमपि द्वयोर्न प्राप्नोति। एक

शेषनिर्देशात्। अथवैकशेषनिर्देशोयं। समर्थस्य च समर्थयोश्च समर्थानां च समर्थानामिति। एवमपि षष्ठ्यां प्राप्नोति। षष्ठ्यां

तिषु द्वयेकशेषः परिसमाप्यते। नैष दोषः। प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति द्वयोरपि भविष्यति। एवमपि विभक्तीनां न प्राप्नोति। सम

र्थोत्समर्थे पदात्पदे इति। एवं तर्हि समर्थपदयोरयं विधिशब्दः सर्वविभक्त्यंतः समासः। समर्थस्य विधिः समर्थविधिः समर्थयोर्विधिः

समर्थविधिः समर्थानां विधिः समर्थविधिः समर्थाद्विधिः समर्थविधिः समर्थे विधिः समर्थविधिः। पदस्य विधिः पदविधिः पदयोर्विधिः

पदविधिः पदानां विधिः पदविधिः पदाद्विधिः पदविधिः पदे विधिः पदविधिः। समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थ

विधिश्च समर्थविधिश्च समर्थविधयः। पदविधिश्च पदविधिश्च पदविधिश्च पदविधिश्च पदविधिश्च पदविधयः। [illegible] शिवः

व्यवस्थापनाच्च। अकिंचित्कुर्वाणमित्यादृश्योप्यसमर्थसमर्थानसमासापरिगणने न निरस्तत्वादिति तदर्थमप्येतन्न भवतीति। सिद्धं विति। वचनाद्यारम्भादित्यर्थः। समर्थपद

संबंधित्वात्पदविधिरूपचारात्समर्थशब्देनोच्यत इतरस्तु पाठेऽयमितिमत्वाह। एवमपीति। यथापश्च नायत्नेनेति गुणेषु संख्याविवक्षेतेनेथेहापि बहुत्वस्याविवक्षितत्वात् १३

प्रत्येकमिति। आश्रितसंख्याविशेषाणां हेतेद्वयोर्वाणां पुनरेकशेषकरणसामर्थ्यात्। एवमपीति। सर्वे

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्वः समास उत्तरपदलोपीति। गतार्थत्वाद्विधिप्रपंचस्याप्रयोग इत्यर्थः। समर्थपदाश्रयत्वाद्विधिरेव समर्थशब्देनोच्यत इत्यर्थः। संबंधसामान्यवचनमर्थंतस्यच परशब्दस्य विधिशब्देन समासे विभक्त्यंतरार्थोपि अंतर्भवतीति सर्वस्य ग्रहणं वक्ष्यति। यादृच्छिकी विभक्तिरिति। भेदाभेदविवक्षा संभवे सति परछया भेद विवक्षामाश्रित्य भेदमयानिर्देशः कृत इत्यर्थः। समानाधिकरणेष्विति। केचिदाचार्याद्रव्यं पदार्थं प्रतिपन्नाः केचिदाकृतिं। गुणशब्देनाप्याकृतिरुच्यते। यथा

समर्थविधयश्च पदविधयश्च समर्थः पदविधिः। पूर्वः समास उत्तरपदलोपी। यादृच्छिकी विभक्तिः। समानाधिकरणेषूपसंख्यानमसमर्थत्वात्। समानाधिकरणेषूपसंख्यानं कर्तव्यम्। वीरः पुरुषो वीरपुरुषः। किं पुनः कारणं न सिध्यति। असमर्थत्वात्। कथमसामर्थ्यं। द्रव्यं पदार्थ इति चेत्। यदि द्रव्यं पदार्थः। न भवति तदा सामर्थ्यं। अथ हि गुणः पदार्थः भवति हि तदा सामर्थ्यं। अन्यो हि वीरत्वं गुणः अन्यो हि पुरुषत्वं। नान्यत्वमस्तीति कृत्वा सामर्थ्यं भवति। अन्यो हि देवदत्तो गोभ्यश्चाश्वेभ्यश्च। न चैतस्यैतावता सामर्थ्यं भवति। को वा विशेषः यद्गुणे सामर्थ्यं स्याद्द्रव्ये च न। एष विशेषः एकं तयोरधिकरणं। अन्यश्च वीरत्वं गुणः अन्यः पुरुषत्वं। द्रव्यपदार्थिकस्यापि तर्हि गुणभेदात्सामर्थ्यं भविष्यति। अशक्यो द्रव्यपदार्थिकेन गुणकृत उपकारः प्रतिज्ञातुं। न नु चाभ्यंतरो सौ भवति। यद्यप्यभ्यंतरः न तु गम्यते। न हि गुड इत्युक्ते मधुरत्वं गम्यते अ-

यस्य गुणस्य भावादिति। संसर्गभेदकं यद्यत्तया पारंप्रतीयते गुणत्वं परतंत्रत्वात्तस्य शास्त्रे उदाहृतमिति गुणत्वस्य गवेरमितिवा कटुकत्वं। एयोगात्। तत्र द्रव्ये पदार्थे वीरः पुरुष इत्येताभ्यां पदाभ्यां द्रव्यमेकमभिधीयते न तु वीरत्वं पुरुषत्वं च। तत्र भेदाधिष्ठानस्य संसर्गस्येदासंभवादसति सामर्थ्ये समासो न प्राप्नोतीति वचनं। अथ यदि गुण इति। वीरत्वपुरुषत्वे चैकव्यक्तिगते ते ताभ्यामभिधीयेते इति भेदपूर्वकः संसर्गोस्तीति भावः। नान्यत्वमिति। उपकारविवक्षायां सामर्थ्यं नान्यत्वमात्रेणेत्यर्थः। एकं तयोरिति। ततस्तद्वारेणास्ति विशेषणविशेष्यभावः। द्रव्यपदार्थिकस्यापीति। एकमपि द्रव्यं गुणसंसर्गाद्भेदकार्यं लभते। अशक्य इति। भेदहेतोर्विद्यमानस्यापि गुणस्य शब्देनावाच्यत्वादित्यर्थः। ननु चेति। द्रव्यस्य गुणेन नित्यसंबंधादि-

भिन्न२

सत्यर्थः। यद्यपीति। अनभिधीयमानो

© Dharmartha Trust J&K. Digitized by eGangotri

गुण[redacted]पदार्थिकेनापीति। यद्यवाच्यस्योपकारकत्वं नाश्रीयत इत्यर्थः। अथावाच्यस्याप्युपकारकत्वमाश्रीयते तदा पक्षद्वयेपि साम्यं क्व च तावदिति। यद्यवा
च्यस्योपकारकत्वं नाश्रीयत इत्यर्थः। यत्र सर्वमिति। समानमेकमधिकरणं यस्य तेन पर्यायेणेत्यर्थः। इति मन्यते। ततश्च यत्र प्रवृत्तिनिमित्तमप्येकं वाच्यं च तत्रैव
स्यादित्यर्थः। कथं पुनरत्र विशेषणविशेष्यभावः। उच्यते। कंचित्प्रतिक्रियाविं तत्संज्ञया सोर्थः प्रसिद्ध इति प्रसिद्धस्याविशेषणत्वमितरस्य तु विशेष्यत्वं। नैवंजातीयकाना
मिति। युगपत्प्रयोगाभावात्सामर्थ्याभावाच्चेत्यर्थः। भृत्यभरणीय इति। अस्ति चायं शिष्टप्रयोग इति भावः। नन्वेतावति। उपाधिभेदाद्भिन्नार्थावित्यर्थः। दर्शनीयाया

गुणपदार्थिकेनापि तत्प्रदेशको द्रव्यकृत उपकारः प्रतिज्ञातुं। अथ गुणपदार्थिकः प्रतिजानीते द्रव्यपदार्थिकोपि कस्मान्न प्र
तिजानीते। एवमनयोः सामर्थ्यस्याभावात्। क्व च तावदिदं स्यात्समानाधिकरणेनेति। यत्र सर्वं समानं। इन्द्रः शक्रः पुरुहूतः पुरं
दरः। कंदुः कोष्ठः कुसूल इति। नैवंजातीयकानां समासेन भवितव्यं। प्रत्ययेन वोत्पत्तव्यं। किं कारणं। अर्थगत्यर्थः शब्दप्रयोगः
अर्थं प्रत्याययिष्यामीति शब्दः प्रयुज्यते। तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयेन न भवितव्यं। किं कारणं। उक्तार्थानामप्रयोग
इति। न तर्हीदानीमिदं भवति भृत्यभरणीय इति। नैतौ समानार्थौ। एकोत्र शक्यार्थे कृत्य अपरोर्हे। शक्यो भर्तुं भृत्यः। अर्हति भर्तुं
भरणीयः। भृत्यो भरणीयो भृत्यभरणीय इति। यत्र च यत्र किंचित्समानं कश्चिच्च विशेषः तत्र भवितव्यं। इहापि तर्हि प्राप्नोति।
दर्शनीयायामाता दर्शनीयमातेति। अत्रापि किंचित्समानं कश्चिच्च विशेषः। किं पुनस्तत्र सद्भावान्यभावो। न क्वचित्सद्भावान्य
भावो न स्तः। उच्यते न्वेदं समानाधिकरणेनेति तत्र प्रकर्षगतिर्विज्ञास्यते। यत्र साधीयः सामानाधिकरण्यं क्व च साधीयः स
मातेति। यदि सति भेदे किंचित्समानमाश्रित्य समासः स्यात्तदा यथावीरपुरुषक इत्यत्रानभिधीयमानम मानाधिकरण्यं। यत्र सर्वं समानं सद्भावान्य शिवः
पिद्रव्यं समानमाश्रित्य समासः स्यात्तथापि सत्ता समानेति समासः प्राप्नोति। ननु परत्वादपवादत्वाद्वात्र षष्ठीसमासो भविष्यति। नैतदस्ति। समानाधि
करणेनेति प्रतिषेधः प्राप्नोति। विधेः कोवकाश इति चेत्। दृष्टाव्यवस्थानं स्यात्। समानाधिकरणेन्तरपद इति स्त्रियाश्च पुंवद्भावः प्रसज्येत। सद्भावान्यभावावि १४
ति समानत्वेनेत्यर्थः॥ ॥श्रीः॥ ॥राम॥ ॥[illegible]

नन्वेतदिति। सत्तायाः सर्वत्र सद्भावाद्व्यभिचाराभावात्तासो समानत्वेनाश्रीयते। पूर्वः परिहारः समानफलत्वमभ्युपगम्य पुनः अत्याप्रकर्षभिन्नेयेणोक्तः। उत्तरस्तु सर्वसाधारणा
सत्तायाः समानत्वव्यपदेशं प्रति निमित्तत्वात्तु नाश्रयेणोक्तः। अथवेति अधिकरणशब्दो ऽभिधेयवाची पर्यनुयोगोद्भूवाचीति समावाना दर्शनीयाया मानेसत्र तु द्रव्यभेदः। अ
भिधेयस्य तु सत्तायाः समानत्वात्समानत्वं स्यात्। अनुदितमिति। विवादः क्तत इत्यर्थः। सर्पिः कालकमिति। इसुसोः सामर्थ्य इति षत्वं वारणार्थं वाचनिकमसामर्थ्यमिति वी

अथवा समानमाश्रीयते यत्समानं भवति च न भवति च। न चैतत्समानं क्वचिदपि न भवति। अथवा यावद्द्रूयात्समानद्रव्येणेति तावत्समा
नाधिकरणेनेति। द्रव्यं हि लोके ऽधिकरणमित्यु[illegible]पचर्यते। तद्यथा। एकस्मिन्द्रव्ये व्युदितं एकस्मिन्नधिकरणे व्युदितं। तथा व्याकरणे
विप्रतिषिद्धं चानधिकरणवाचीति अद्रव्यवाचीति गम्यते। एवमपीदमवश्यं वक्तव्यं समानाधिकरणम समर्थवद्भवतीति। किं प्र
योजनं। सर्पिः कालकं यजुः पीतकमित्येवमर्थं। यदि समानाधिकरणं समसमर्थवद्भवतीत्युच्यते। सर्पिष्पीयते यजुष्षीयते इस
सुषत्वं न प्राप्नोति। अधातुभिहितमित्येवं तत्। एवं च कृत्वा समानाधिकरणेषूपसंख्यानं क[illegible]र्त्तव्यं वीरः पुरुषो वा रपु
रुष इति। किं कारणं। असमर्थत्वात्। न वा वचनप्रामाण्यात्। न वा कर्त्तव्यं। किं कारणं। वचनप्रामाण्यात्। वचनप्रामाण्याद्दत्र समासो
भविष्यति। किं वचनप्रामाण्यं। समानमध्यमध्यमवीराश्चेति। लुप्तार्ख्यातेषु च। लुप्तार्ख्यातेषु चोपसंख्यानं कर्त्तव्यं। निष्कौशाम्बिः
निर्वाराणसिः। लुप्तार्ख्यातेषु च। किं वचनप्रामाण्यादित्येव। किं वचनप्रामाण्यं। कुगतिप्रादयः इति। प्रत्ययस्य तस्य वचने प्रयो
जनं। किं। सुराजा अतिराजेति। नञ्भोद्वित्तिस्त्वेव वचनप्रामाण्यादिति। किं तर्हि वार्त्तिककावचनप्रामाण्यादिति। सिद्धं तु कुम्भ इति दुर्गति

रपुरुष इति समानाधिकरणसमासो ऽपि न स्यादित्यर्थः। अधातुभिहितमिति। धातुसहुच्चारितः प्रत्ययो धातुशब्देनोक्तः तेनाभिहितं कर्म [वचनात्मादयः कार्य इति।।]
द्वियदि भवति तदा सामर्थ्यमेवेत्यर्थः। नवेति। वचनसामर्थ्याद्वाचनिकमसामर्थ्यं बाध्यत इत्यर्थः। वीरः पचा क्रियाद्वैतु धातुभिहिते ऽनभिधानाद्धुकुलयद्भुणादसमा
साभावं मन्यते। लुप्तार्ख्यातेषु चेति। वचनप्रामाण्यादित्यस्योपजीवनार्थं वार्त्तिकमिदं। भाष्यकारस्तु प्रपंचार्थमुपसंख्यानं प्रति विधानं च वाक्यभेदेनाचष्टे। आख्यातश
ब्देन क्रियापदं का ताघपि कथ्यते। निष्कौशाम्बिरिति। पूर्वपदोत्तरपदयोरसामर्थ्यमन्यते। क्रियाविषयत्वादुपसर्गाणां द्रव्येणासंबंधाभावात्। किं तर्हीति। वार्त्तिककारस्व
चनस्यापि स्मृतिशास्त्रप्रामाण्यमाश्रितमि

© Dharmartha Trust J&K. Digitized by eGangotri

भा॰के॰ १५

तस्यार्थ इति। क्रांतशब्दस्य योऽर्थः संप्रतीयते तेनेति। शब्देनाक्रियाविषयेण तस्यार्थस्य सामर्थ्याद्धाक्षिप्तत्वान्तरेण पूर्वपदोत्तरपदयोः सामर्थ्यादिस्यर्थः। सोऽर्थ इति। नित्यस
वाक्रांतत्वलक्षणोऽर्थ इति दर्शयति। अथ यत्रेति। यत्र विशिष्टे पूर्वोत्तरपदे उपात्ते यथाद्वित्रा इत्यत्र त्रितत्वनाकबहूनां प्रसंगः। यत्रत्वविशेषोनोपात्तः अनेकमन्यप
दार्थे चार्थे द्वंद्व इति तत्र संदेहः। यदि सुप्सुपेति वर्तते ततोविवक्षितत्वात्संख्यायाः द्वयोर्द्वयोः समासे न भवितव्यं। अपेक्षितसंख्यावक्तारमन्यपदार्थे चार्थे द्वंद्व इति ताव
ताभावात्। नन्वनेकग्रहणं द्वंद्वानामपि भावाभ्यां अन्यथा तदनर्थकं स्यात्। नैतदस्ति। अनेकग्रहणमुपसर्जनसंज्ञार्थं आत् विनृगुरित्यादौ इत्यस्यार्थं परत्वे ... किं नेत्यप

तदर्थगतेर्वा पृथक्। तदर्थगतेर्वा पुनः सिद्धमेतत्। किमिदं तदर्थगतेरिति। तस्यार्थस्तदर्थः तदर्थस्य गतिस्तदर्थगतिः त
दर्थगतेरिति। यस्यार्थस्य कोऽर्थः। या सामर्थ्यं सा नि साध्यते। ~~अथ यत्र बहूनां~~ मामनर्थं वा सोऽर्थस्तदर्थः। तदर्थस्य गतिः त
दर्थस्य गतिः तदर्थगतिः तदर्थगतेरिति। योऽर्थः कोऽर्थः। सा समर्थः सा निसोध्यते। अथ यत्र बहूनां समस्तप्रसंगः। किं तत्र
द्वयोः समासो भवत्याहोस्विदविशेषेण। कश्चात्र विशेषः। समासो द्वयोर्द्वयोश्चेद्द्वंद्वेऽनेकग्रहणं। समासो द्वयोर्द्वयोश्चेत्
द्वंद्वेऽनेकग्रहणं कर्तव्यं। चार्थे द्वंद्वोऽनेकमिति वक्तव्यं। इहापि यथा स्यात्। प्लक्षन्यग्रोधखदिरपलाशा इति। अविशेषे
अत्रापि द्वयोर्द्वयोः समासो प्राप्नोति। द्वयोर्द्वयोः समास इति चेन्न बहुषु द्विवचनाभावात्। द्वयोर्द्वयोः समास इति चे
न्न। किं कारणं। बहुषु द्विवचनाभावात्। न बहुषु द्विवचनमस्ति। नावश्यमेवं विग्रहः करिष्यते प्लक्षश्च न्यग्रोधश्च खदिर
श्च पलाशश्चेति। किं तर्हि। एवं विग्रहः करिष्यते प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ खदिरश्च पलाशश्च खदिरपलाशौ प्ल
क्षन्यग्रोधौ च खदिरपलाशौ च प्लक्षन्यग्रोधख

शिवः ११ शिवः

वादि १४